दश्याश्चैककलाद्वयं । द्वादशीद्वादशीहैंतित्रयोदश्यांतुपारणं ।

कळाद्वयंत्रयं वापिद्वादशीनातिक्रमेत्। पारणेमरणेन्नृणां
तिथिस्ताकालिकीस्मृतेति। नतुद्वादश्यतिक्रमेपिनास्तिदोषः।
सातिथिःसकलाज्ञेयतिवचनंसाकल्यविधानादितिवत्। एवं
साकल्यंस्नानादिविषयत्वात्साकल्यंरात्रौस्नानजपादिष्वि
त्यविधानात्। पारणंतुनसाकल्यवचनंप्रवर्तते। तिथिस्ताका
लिकीस्मृतिवचनात्। द्वादशीकाळेयद्वापारणंतद्दातःप्रा
गेवसर्वाःक्रियाःकर्तव्याः॥ तदुक्तंनारदीये। अल्पायामथवि
प्रेद्वादश्यामरणोदये॥ स्नानार्चनक्रियाःकार्यादानहोमा
दिसंयुताः॥ एतस्मात्कारणाद्विप्रःप्रत्यूषस्नानमाचरेत्॥पित
तर्पणसंयुक्तंस्वल्पांदृष्ट्वाद्वादशीं। महादानिकरीत्यैषा
द्वादशीलंघितान्नृणां। करोतिधर्महरणंस्नातेवसरसप्तमीति।
गरुडपुराणेपि। यदास्वल्पाद्वादशीस्यादपकर्षेच्छुजेनवेत्।

प्रातर्मध्याह्निकस्यापितत्रस्यादपकर्षणमिति। स्कंदपु
राणेपि। यदानवेदतीवाल्पाद्वादशीपारणादिने। उषःकाले
द्वयंकुर्यात्प्रातर्मध्याह्निकंचतदिति। तत्रपारणासंनवेद्ध
द्वित्वंपारणंकुर्यात्। तदाहकात्यायनः। संध्याद्वयंनवेनि
त्यंपारणंतुनिमित्तकं। अदृष्ट्वापारयित्वाथनैत्यकंतुतिथिं
नवेदितिदिवत्यापि। संकटेविषमेप्राप्तेद्वादश्यापारयेत्क्वचित्।
अदृष्ट्वापारणंकुर्यात्पुनर्भुक्तंनदोषकृदिति। यदाकाळेना
पिहाद्वादशीनास्तितदात्रयोदश्यामपिपारणंकुर्यात्। तदुक्तं
नारदीये। त्रयोदश्यांहिसुद्वायांपारणंदृश्यतेफलं। शतय
ज्ञाधिकंवापिनरःप्राप्नोत्यसंशयमिति। पारणंचनवेद्यंतुळ
सीमिश्रितंकुर्यात्। तदुक्तंस्कंदपुराणे। कृत्वावैवोपवासंतु

या ज्ञातिद्वादशीदिने नैवेद्यंतुलसीमिश्रं हत्याकोटिविना
शमिति। अथ एकादशीमहिमा। तत्रवशिष्ठः एकादशीसमु
द्यनवद्दिनापातकंघनं। नस्मृतायातिराजेंद्र अपिजन्मशतो
द्भवं। नेदृशंपातकंकिंचिन्नराणामुपविंधते। यादृशंपुरु
षस्यान्यदिनपातकहानिदं। तावत्सापानिदहेन्मस्तिष्ठतिमनु
जाधिप। यावन्नोयवराजेंद्रःपद्मनाभदिनस्मरेत्। अश्वमेध
सहस्राणिवाजपेयशतानिच। एकादश्युपवासस्यकलांना
र्हंतिषोडशीं। एकादशींदिनेयःपापंयत्कृतंभवतिप्रभो। एकाद
श्युपवासेनतत्सर्वंविलयंव्रजेत्। एकादशीसमंकिंचित्पा
पघ्नंन विद्यते। स्वर्गमोक्षप्रदात्येषाराज्यपुत्रप्रदायिनीसुक
लत्रप्रदात्येषाशरीरारोग्यदायिनी। नगंगानगयान्नपुष्क
रीनचपुष्करंनचापिकोरवक्षेत्रंनरवानचवेदिका। यमुना

DR BHAU DAJI

द्वितंतातनेकलक्षमुपाहरेत्। द्वादशीसहितंदानंमनर्थंहरिवासरइति। दिनाऽ

चरभागाचतुल्याश्चपद्मरीईनात्। अनायासेनराजेंद्रप्राप्यतेविष्णवं
पदं। चिंतामणिसमाह्येषात्यथवापिनिधेःसमा। साकल्यपादपु
रयाचेदोदापमातथेति। अस्यामेकादश्यांयान्युपवासपुतिनिधि
रूपाणिएकभक्तनक्तायाचितदातानितेषांप्रतिपत्तौन्यायेनोपयोगितिथ
वृद्धानांयानिस्वंतंत्राण्येकभक्तनक्तादीनितेषांपूर्वोक्तन्यायेनमध्या
ह्नानितिथियहणापाप्तौदशमीविद्धापुतिषिध्यते। द्वादशीकल्पपूर्णवि
द्धोदनार्हंननंदापूर्णामपित्यजेत्। यदीछेद्दासंतानंनियमेनचतु
र्दशीं। नोपोषितंचेनक्तंचेनैकभक्तमयाचितं। नंदायांपूर्णविद्धायां
कुर्यान्मोहात्। एकादशीयतोराजन्द्वादश्यांसमुपोषणं। नक्तंचापा
चितंनित्यमेकभक्ततथाचेन नक्तायाहुर्नसाचहं सप्तमुद्भूतैरि
त्यर्थः। एतदेवाग्निमत्यादिकंचदशमिस्तथेत्यादृत्तेतथासप्त
मुहूर्तस्तुयोयंयाधनेयुतमितिचंद्रोन्यूनाधेलुतथांतरेण

ऐश्वर्य

तमध्याह्नव्यापित्वेन ग्रहीतव्या। इयमेकादशीनिर्णयः। अथ द्वादशीनिर्णयः
तत्र युग्मादिशास्त्रेण पूर्वविद्धा ग्रहीतव्या। स्कंदपुराणे। द्वादशी च पूर्व
त्रैव्याप्येकादश्यायुता विशेषतः सदा कार्या चेद्धरिर्दिने विलुभतेऽन्यमा
नवैरिति। उत्तरविद्धा पुनिषेधति। बृहस्पतिः। द्वितीयापंचमीविद्धा द
शमी चैव योदशी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरतिथी इति। एवं
चैकस्यां दशम्यामुपवासो द्वादश्यामुपवासश्चेत्युभयमेकस्मिन्नहनि प्राप्तं
तिउभयस्यान्योन्यविरोधात्पक्षद्वयानुष्ठानेऽविप्रतिपत्तिः। नन्वे
न्येद्युरुत्तमसमाप्त्युत्तरमनुष्ठातुमशक्यं असमाप्तेद्युरुत्तमे पूर्वेद्यु ॥८॥
रुकुर्यादुत्तरेमितिरात्रान्मेयं इदं हि शास्त्रमेवमुत्तरस्यमे मास
शुक्लायां चतुर्दशी। सारात्रिव्यापिन्यां त्यापरप्रदोषव्याप्ति
नि। परामास्तेतरवर्तिनीशुक्लाचतुर्दशीकृष्णाचतुर्दशीतु
पूर्वयुतेत्यत्र। तथा चापस्तंबः। कृष्णपक्षेशुभीचैव कृ

ष्णेवृत्तंतरोपक्रमंनिवर्तितमकृत्वोत्तरद्वयस्यापिसहैवोपक्रमइति
तंत्रेणानुष्ठानंनविप्रतिषिद्धंनन्वेवंखंडतिथौसंपूर्णतिथौत्वेका
दशीद्वादश्युपवासोद्वौनंतर्येणप्राप्तुतः। तत्रपारणमंतरेण
प्रथमोपवासस्यासमाप्तत्वादुद्वितीयोपवासप्रक्रमोनसंभ
तीतिचेन्नैवं। अद्भिःपारणंकृत्वाद्वितीयोपवासस्यप्रक्रतु
शक्यत्वात्। तादृशंतुपारणमशितानाशितोपमरूपं। तत्राशि
तरूपात्पूर्वोपवासंपरिसमापयति। अनशितरूपत्वेनो
त्तरोपवासंनेवहंति। एतच्चात्मकंदर्शपूर्णमासप्रकरणे
याजमानब्राह्मणेश्रूयते। यदायज्ञेनुपवसेन्नोधुकःस्याद्यदा
श्नीयात्तदोस्यपशूनभिमन्येतापोश्नातितन्नेवाशितंनक्षुधको

भवति नास्यरुद्रःपशून्निमन्यत इति तस्मादुदकपारणेनो
पवासेद्वयनिर्वाहः एतच्च सर्वतिथिसाधारणं प्रकृतेत्वेकाद
शीद्वादश्येदेवतेत्यादुदकपारणमेतरणापिनकश्चिद्दोषः॥
अत एवस्मर्यते। एकादशीमुपोष्यैवद्वादशीसमुपोषयेत्तु
तत्र विधिलोपस्यादुन्नयाद्वैतद्धरिरितिउपवासद्वयासक्तौ
केवलद्वादश्युपवासेनोन्नयाःफलंसिध्यतीतथाचस्मृतिः। ए
कामेकादशीशुक्लांद्वादशीमुपोषयेत्पूर्वोपवासजंपुण्यंस
र्वंप्राप्नोत्यसंशयमितिद्वादश्यांवाकाम्योपवासोमाकेडेयन
वदन्निति। द्वादश्यामुपवासेनसिद्धार्थानृयसर्वज्ञाः॥ चक्रवर्तित्व
मतुलंसंप्राप्नोत्यतुलांश्रियमितिच॥ इतिद्वादशीनिर्णयः॥ अ
थत्रयोदशीनिर्णीयते। साचशुक्लपक्षेनदनव्यवतिष्ठते। तत्रशु

क्लत्रयोदशीपूर्वविद्धाग्राह्या। तदुक्तंब्रह्मवैवर्ते त्रयोदशीप्रकर्त्तव्या
द्वादशीसहितासुले। नूनंविद्धानकर्त्तव्यादशीपूर्णाकदाचनेतिय
द्यपित्रयोदशुक्लपक्षेद्वेनास्तितथापिकृष्णत्रयोदश्यांपरविद्धता
यावाचनिकल्पापूर्वविद्धायाःशुक्लपक्षविषयत्वंपरिशिष्यते। सा
यंकालत्रिमुहूर्त्तमात्रव्यापित्वेनपूर्वविद्धतायांप्राप्तायांप्रतिपदइ
वास्यानर्थपराहसंबंधोऽपेक्षितइतिद्रष्टव्यं। स्कंदपुराणेत्रयोद
शीप्रकर्त्तव्यायानेदापराद्विकीर्तितेत्रत्रयोदश्याःपरविद्धत्वमु
क्तंनिगमेषष्ठ्यष्टमीअमावास्याकृष्णपक्षत्रयोदशी। एनाःपूज्याः
पराःपूर्वयुतास्तथेतियत्तुदृष्टदृष्टशिष्टवचनंयापंचमीविधाद
शमीत्रयोदशीचतुर्दशीवोपवासेहन्युःपूर्वोत्तरतिथीइ
तितच्छुक्लपक्षविषयं। यदातुकृष्णपक्षेपरविद्धानलभ्यते। तदा

पूर्वविद्धा ग्राह्या। तदाह वसिष्ठः एकादशी तृतीया चतुर्दशी वेत्रयोद
शी। पूर्वविद्धा तु कर्त्तव्या यदि न स्यात्पराहनीति। अनंगत्रयोदशी
च पूर्वविद्धा। तदाह संवर्त्तः कृष्णाष्टमी बृहत्तपा सा विज्ञेया दर्पहा
की। अनंगत्रयोदशीरत्नाऽपोष्याः पूर्वसंयुताइति। अनंगत्रयोद
शीव्रतं विष्णुपुराणादिनोक्तं। मार्गशीर्षे मलपक्षइत्युपक्रम्यव्रतं
विधायाऽनंगेनकृतादयेति नानंगत्रयोदशीमुपसंहारन्नानन्च
मूलपक्षइतिशुक्लपक्षएवतद्व्रतं विहितं। तथाचत्रयोदशीप्रक
र्त्तव्याद्वादशीसहिततयेननसामान्यशास्त्रेणवानंगत्रयोदश्याः ॥७॥
पूर्वविद्धत्वं प्राप्तंवाढं। तद्वानविशेषणशास्त्रेणविरुध्यते किं
येते॥ इतित्रयोदशीनिर्णयः॥ अथचतुर्दशीनिर्णीयते। अ
त्रापिशुक्लकृष्णपक्षभेदानव्यवस्थाऽवति। तत्रयुग्मशास्त्रे

णशुक्लचतुर्दशीपरविद्धा ग्राह्या। तथाव्यासोपि। शुक्लाच
तुर्दशीग्राह्यापरविद्धासदाव्रतइति। पूर्वविद्धानिषेधउत्त
रविद्धाविधिश्चैवमुभयंनविष्णुपुराणेपठ्यते। सदाकार्यात्र
योदश्यानतुयुक्तावतुर्दशी। पौर्णमासीयुतासास्याच्चतुर्दश्या
चपूर्णिमेति। नारदीये पितृतीयेकादशीषष्ठीशुक्लपक्षेचतुर्द
शी॥ पूर्वविद्धानकर्त्तव्यापरसंयुतेति। यच्चनारदीयंशुक्लचतु
र्दश्यामनंतव्रतंनविष्णोतरविहितं। तत्रपूर्वविद्धापरविद्धावा
मध्याद्व्याप्तिनीग्राह्यतिकेचिदाहुः। लिंगंचतत्रप्रमाणत्वेना
दाहरंति। मध्याह्नोज्यवेलायांसमुत्तीर्णसरित्तटे। ददर्शशी
लासास्त्रीणांसमूहंरक्तवाससां। चतुर्दश्यामथैकत्र्यं तंनक्त्वा

देव पृथक्पृथक् इति। अत्र मध्याह्नोजवेल्लायामित्यनेन
मध्याह्नस्य कर्मकालत्वं प्रतीयते। अतस्तद्व्यापिनी तिथिर्ग्राह्या।
नैतत्सारं। यथा विनायकव्रतं मध्याह्नपूजयन्नपि मध्याह्नः
कर्मकालत्वेन विहितः। नात्र तथाविधिरस्ति उदाहृतं तु लिंग
मर्थवादगतत्वान्न स्वातंत्र्येण कस्यचिदंशस्य प्रमापकं किंतु स
तिप्रमाणांतरतस्यापाङ्गत्वकल्पनावतिनात्र प्रमाणांतरं पश्यामः
अतोनमध्याह्नः कर्मकालः तथासतिदेवलादयिकी ग्राह्यतिव
द्धेनयुग्मशास्त्रादिनिश्चउदयव्यापिनीग्राह्यासाचतिथ्यंत
रवत्रिमुहूर्त्तितिमुख्यःकल्पः।हिमुहूर्त्तेत्यनुकल्पः।एवंचसति ॥१८८॥
निशाचारेप्यनुगृहीतोभवति। चैत्रसावनचतुर्दश्यांशूलेपि
रात्रियागिण्यांग्राह्यातथाचबोधायनः।मघाश्रावणमासस्यशु
क्लायाचचतुर्दशी॥सारात्रिव्यापिनीग्राह्यापरापूर्वाङ्गगामिनीतिप

रामासांतरवर्त्तिनीशुक्लचतुर्दशी। कृष्णचतुर्दशीतुपूर्वयुते
वग्राह्या।तथाचापस्तंबः।कृष्णपक्षेष्टमीचैवकृष्णपक्षेचतुर्दशी।
पूर्वविद्धातुकर्त्तव्यापरविद्धानकस्यचिदिति।अपराह्णव्यापि
नीशुक्लचतुर्दश्यपिपूर्वविद्धाग्राह्यातथाचस्कंदपुराणेचतुर्द
शीचकर्त्तव्यात्रयोदश्यायुताविद्धामहत्कैर्महाद्भिर्नवेधो
वापराद्धिकीर्तितादर्शविद्धानकर्त्तव्याराकाविद्धाकदाचनेतिअ
त्रमहत्कैरितीश्वरोक्तिर्लिंगात्।शिवचतुर्दशीविषयंतद्दृष्ट्वे
तदेवंव्रतातरेतुचतुर्दशीनिर्णीता॥१॥अथशिवरात्रिव्रतंनि
र्णीयते।तत्रेदंचिंत्यते।किमयंशिवरात्रिशब्दोरूढः।किंवायौ
गिकः।उतलक्षणिकः।अथवायोगरूढइति।तत्ररूढइतिप्राप्तं।
कुतःतिथिविशेषेशिवरात्रिशब्दस्यसंज्ञारूपेणस्मरणात्

तथाच नागरखंडे माघमासेस्यनोषेणप्रथमाफाल्गुनस्यचकृष्ण
चतुर्दश्यां। तद्रात्रिःशिवरात्रिस्यात्सर्वपुण्यसुनोवहेति।यद्यप्य
त्रप्रकीर्तितेतिकामिकेपिमाघमासासितपक्षेविधानेयाचतुर्दश्यां।
तद्रात्रिःशिवरात्रिः।शिवस्यरात्रिःशिवरात्रिरित्यवयवार्थःप्रती
यतेतथापियोगारूढःप्रबलत्वाद्योगान्नग्राह्यः।शाब्दत्वाच्च
कर्णादिशब्दवद्गम्यतेः।अश्वस्यकर्णइत्यवयवार्थप्रतीतावव
यवमुपेक्ष्यरूढावृक्षविशेषवत्वीकारात्।ननुकाकदंत
परीक्षासमोऽयंविचारः।यद्यप्ययंशिवरात्रिशब्दारूढयदिवायो
गिकःउभयथाप्यनुष्ठानेविशेषाभावात्।मैवं।अस्त्यवमहान्वि ॥१८७॥
शेषः।यौगिकत्वेशिवसंबंधिव्रतजातंसर्वयस्यांकस्यांविद्धायां
वानुष्ठीयतेसासर्वाशिवरात्रिःस्यात्।माघमासपदंवनदानींउप
लक्षणंनवत्।रूढिपक्षेतुमाघमासादेर्विशेषणत्वात्।नहिशिष्टा

याएकस्यांएवतिथेःशिवरात्रित्वंयतःकर्तव्यएवविचारःतत्रा
दीनन्यायेरूढिमेवाश्रियामहेतस्यचन्यायस्यसंग्राहकवेतीक्ष्ण
कोऽवतेःअहीनस्यद्वादशीतिप्रकृतावुतवैकृतेऽहीनइतियो
गेनप्रकृतातदिकल्पतांशीघ्रधीहेतुतोरूढेनहीनेविकृताविद
ंउत्कृष्यतांद्वादशत्वंसाङ्गात्प्राकृतकर्मणःअयंमर्थः॥ शिवरा
ज्योतिष्टोमप्रकरणेश्रूयते॥तिस्रएवसायाङ्गस्यापसदोद्वाद त्रि २०
शाहीनस्ययज्ञस्यसवीर्यत्वयतिअङ्गासहवर्तंतइतिसाङ्गःएक
दिननिष्पाद्योज्योतिष्टोमःतस्यप्राचीनेषुत्रिषुदिनेषुअगत्वेना
नष्ठेयद्दामाउपसद्यस्यवाच्याःतासुसउपनाद्योविधायपुन
रहीनत्वाद्वाच्यस्यकर्मणोद्वादशापसद्योविधीयतेतत्रसं
शयःकिमिदंद्वादशापसत्वंद्विरात्राद्यहीनत्वंप्रकृतिन्यूनसा
ङ्गत्वाद्वाविप्रकृतज्योतिष्टोमेनिविशतेअहोस्विदहीनश्रुत्यावचे

विकृतिरूपद्विरात्रादावुत्कृष्यत इति तदर्थमिदं चिंत्यते। अहीन
नशब्दः यौगिकोरूढ्या इति तत्र नञ्हीन इति व्युत्पत्तेर्विस्पष्टं प्रती
यमानात्। यौगिकएवायं तदर्थएव वक्तव्योपपन्नः। सोमा
स्यप्रकृतेर्न स्यसंस्कार्यस्य साक्षाद्वाचकशब्दस्यवापादिष्टत्वेन ही
नत्वात्। विकृतेस्तु विशेषएवेवाचकशब्दरूपदिश्यतेइतरत्सर्व
मतिदेशात्प्राप्तमेव। अतउक्तिसंकोचविकृतेर्हीनत्वाएवंच
सतिज्योतिष्टोमप्रकृतिसंनिवात्प्रकरणानुग्रहाच्चतत्रैवाहशब्दस्यनिविशते। नचपूर्ववाक्यविहितेनानु
वादेनबाधःशंकनीयःशक्तयासमानबलत्वव्रीहियवचोदि
ल्यापपत्तेः। तस्माज्ज्योतिष्टोमएवाहर्गणविधिरितिप्राप्तेब्रूमः
विकृतिरूपद्विरात्रादावविहाहशब्दस्यविधीयतेकुतः। अहीन
नशब्दस्यश्रुतिप्रयोगबाहुल्येनतत्रैववरूढत्वात्। रूढ्याहीन

DR. BHAU DAJI

DR. BHAU DAJI

श्रबुद्धिहेतुत्वेनयोगाद्बलीयसी। योगेत्ववयवार्थप्रथमतोनिश्चित्यप
श्चात्समुदायार्थोनिश्चेतव्यइतिविलंबःनचात्रप्रकरणविरोधः शं
कनीयः। बलीयसावाक्येनप्रकरणस्यबाधितत्वात्। तस्मादिद
मेवाहशब्दंप्रकृतिज्योतिष्टोमादुत्कृष्यविकृतिद्विरात्रादिषुनिवे
शनीयमिति। अत्रयश्चारूढोऽहीनशब्दःतथाशिवरात्रिशब्दो
ऽपिरूढइतिप्रथमःपक्षः। अत्रपरेआहुः। यौगिकएवायंशिव
रात्रिशब्दःकुतःशिवसंबंधमुपजीव्यप्रवृत्तत्वात्। तथाचस्कं
दपुराणे। माघस्यकृष्णपक्षेयातिथिश्चैवचतुर्दशी। शिवरात्रिरि
साख्याता सर्वपापनिषूदनी। तस्यरात्रेःसयाख्याशिवरात्रिःशि
वप्रियात्स्यात्सर्वेषुलिंगेषुसदासंक्रमतेहरः। यानिकान्यत्रलिं
गानिचराणिस्थावराणिच। तेषुसंक्रम्यतद्वितस्यारात्रौयतोहरः।
शिवरात्रिस्ततःप्रोक्ततेनसाहरेवल्लभेति। शिवरूढ्यातत्रत्यै

वदेवर्षमाघकृष्णचतुर्दशी। शिवरात्रिःसमाख्या प्रियं त्रि
पुरद्विष इति। अवंतीखंडे। माघफाल्गुनयोर्मध्ये असितायां
चतुर्दश्यां। शिवरात्रिस्तु सा ख्याता सर्वपापनिषूदनी तस्मा
च्छिवसंबंधिनीरात्रिः शिवरात्रिरितियौगिकार्थः प्राक्षणीन्याय
नात्रगृहीतवान्तस्यवन्यायस्यसंग्राहकावेतौश्लोकौनवतःस
स्कारप्राप्तियागेषुकेवृतेप्राक्षणीरितिसंस्कारंसार्वत्रिकमत्वा
ज्ञातिमुद्दिश्यनोक्तितः। अन्यान्याश्रयतानाद्यानजातिःकल्पा
ज्ञातिःयौगिकः। कुप्तशक्तित्वात्। कुप्तिर्व्याकरणेस्थिता। अ
यमर्थः। दर्शपूर्णमासेश्रूयते। प्राक्षणीरासादयतीति। तत्रसंश ॥१९१॥
यः। किमयंप्राक्षणीशब्दः। आसादनादिमंत्राणांह्रदकसंस्का
रंवृतेकिंवाजलावांतरजातिविशेषंअहोस्वित्पात्राण्या
ज्यस्थाली इतियागः। अत्रसंस्कारंवृत इतितावत्प्राप्तं कुतःसार्वत्रि

कत्वात्। सर्वेषुहिसंस्कारंविधिवाक्यादिप्रदेशेषुप्राक्ष
णीशब्दःश्रूयते। प्राक्षणीरासादयेदध्वर्युरित्यादौ। अथवाकेप्रयोगः। प्राक्षणीरासादयेतीतिविधिवाक्ये एवमे
लिमंत्रणादिवाक्यान्यपुदाहरणानि। तस्मात्संस्कारंवृत
इत्येकःपक्षः। जातिंवृतइतिपक्षांतरं। लोकेहिजलक्रीडासुप्रो
क्षणीर्निसृजेतिताःस्मइत्युदकजातौप्रयोगोदृश्यते। तत्रतावत्
संस्कारंवृतइत्याद्यःपक्षःउपपद्यते कुतः अन्योन्याश्रयात्। ना
पिजातिंवृतइतिद्वितीयःपक्षायुक्तः। उदकजातौप्राक्षणीशब्दस्य
वा व्यक्तौ तारेपूर्वमकृत्वेनतःपरंशक्तेःकल्पनीयत्वप्रसंगात्। नचयो
गेपिशक्तिःकल्पनीयेतिशंकनीयं। व्याकरणेनैवकृत्वाद्याकरणे
हिउलूखलसंइत्यस्माद्धातोःकरणेल्युट्प्रत्ययेनशब्दोक्तपादि

तः।तथासतिप्रकर्षणोक्ष्यंतेऽनेनेतियोगेनसंज्ञासाधनमुद
कादिकंसर्वंप्रोक्षणीशब्दवाच्यंसंपद्यते।प्रकृतेतुस्त्रीशब्द
वाच्यानामपांसंज्ञासाधनत्वात्तद्भावकस्यप्रोक्षणीशब्दस्यङी
प्प्रत्ययांतत्वेनप्रोक्षणीरि।ण्तिद्वितीयाबहुवचनांतशब्दोनि
पात्यते।नन्वहीनाधिकरणरूढःप्राबल्यमुक्तंप्रोक्षण्यधिकर
णेतुयोगस्यप्राबल्यमुच्यते।अतःपरस्परविरोधःमैवं।ल
ब्धात्मिकाहिरूढियोगमपहरतीतिनहिप्रोक्षणीशब्दरूढिर्लभ्यते
वृद्धव्यवहारेजातावव्युत्पादित्वात्।अहीनशब्दोदिनरात्रादिषु
द्वैनव्युत्पादितइतिचेत्।नहिव्याकरणेव्यक्तपादितत्वात्।अज्ञः
स्वःक्रतौवित्पेनवारुचेनवार्तिकेनीहशब्दात्प्रत्ययमुत्पाद्यतस्य
नादेशंकृत्वाऋतुविषयतयामुत्पादितोऽहीनशब्दःनन्वेवंघट

कुटीप्रभातन्यायस्तवप्रसज्येत।यतोहीनशब्दंयोगंपरिहर्तुका
मेनभवतातव्याकरणमुपजीव्ययोगेपर्यवसानंकृतं।नायंदो
षःपूर्वपक्षेणाभिमतेनसमासलक्षणेनयोगपर्यवसानस्या
न्निधानात्।नचनञ्समासोपिव्याकरणेव्यक्तपादितइतिशंक
नीयं।नञ्समासस्वीकारेसतिअयंशोवाएषइत्यादाविवहीन
शब्दस्याघकारांतत्वप्रसंगात्।मध्योदात्तोह्ययंशब्दोआम्नायते
तस्मात्पक्षद्वयेसमासरूपंयोगंपूर्वपक्षाभिमतंनिराकृत्यश्रोत
रूढिःसिद्धाभिनासमाश्रितामेवरूढिंप्रकटयितुंवरंविनावा
र्तिककृत्।अतःसत्यपिप्रकृतिप्रत्ययविभागेयौगिकत्वंशं
कितुंशक्यते।यथागोत्वजातेरूढ्यागोशब्दस्यौक्षादिकस्तस्ये
षुगमेर्जरितिप्रकृतिप्रत्ययविभागंकृत्वागच्छतीतिगौरितिव्युत्प

तिःप्रदर्शिता। तद्वदत्रापि अवगंतव्यो प्राक्षणीशब्दस्तु रूढिज्ञापनायं किंचित्स्वतंत्रसूत्रं विहितमस्ति किंतर्हि सर्वधातुसाधारणो नावएवार्थस्यात्पदैकनल्युट्प्रत्ययेननिर्मिकएवायंप्राक्षणीशब्दः तस्मात्प्राक्षणीशब्दवत्तेशिवरात्रिशब्दोयोगिकइतिद्वितीयः पक्षः। अन्येपुनर्मन्यंतेलाक्षणिकोऽयं शिवरात्रिशब्दः। तिथिवाचकेन तेनशब्देनतत्तिथाक्रियमाणस्यव्रतविशेषस्यलक्ष्यमाणत्वात्। अतएवज्ञानसंहितायांयुक्तंशिवरात्रिव्रतंनामसर्वपापप्रणाशनं। आचांडाळमनुष्याणांमुक्तिमुक्तिप्रदायकं। अर्द्धरात्रादधश्चोर्द्धयुक्तायत्रचतुर्दशी। तत्तिथावेवकुर्वीतशिवरात्रिव्रतंव्रती। शिवरात्रिव्रतंकार्यंनृत्तान्वितमहानिशि। शिवरात्रिव्रतंदेवकरिष्यतवसंनिधौ। निर्विघ्नंकुरुमेदेवत्वत्कृताद्यमहेश्वरेति। नार

शिवरात्रिव्रतं

॥१९३॥

दीयसंहितायां। अर्द्धरात्रयुतायत्रमाघकृष्णचतुर्दशी। शिवरात्रिव्रतंतत्रसोऽश्वमेधफळंलभेतेति। स्मृत्यंतरेपि। मेवद्यत्रत्रयोदश्यांमूतव्यापूजनिशा। शिवरात्रव्रतंतत्रकुर्याज्जागरणंतथेति। पद्मपुराणेपि। अर्द्धरात्रादधश्चोर्द्धयुक्तायत्रचतुर्दशी। तत्तिथावेवकुर्वीतशिवरात्रिव्रतंतीति। स्कंदपुराणेपि। शिवरात्रिव्रतंदेवकथयस्वमहेश्वरेति। नचकाळवाचकस्यलक्षकत्वमयुक्तंचरमितिशंकनीयंकाळवाचकान्यमावास्योपोर्णमासीशब्दान्यांयागत्रयरूपयोरिष्योःतत्काळसंबंधिन्यारुपलक्षितत्वात्। अतएवस्मृयंते। एवंविद्वान्पौर्णमासीयजतेयएवंविद्वानमावास्यांयजतेइति। स्मृतिष्वपितिथिवाचकःशब्दस्तत्संबंधिनोव्रतविशेषाउपलक्ष्यंतेस्कंदपुराणे। जन्माष्टमीनवकृताकदाचित्कल्पायुतंपच्यतेरौरवेष्विति। ऋष्यशृंगोपि। एकादशीनकुर्वीतक्षीयतेद्वाद

रीयदिएवमन्यत्रापुदाहार्य्यं।तस्माल्लाक्षणिकोयंशिवरात्रि
शब्दइतितृतीयःपक्षः।अथसिद्धांतेब्रूमःयोगरूढएवायंशि
वरात्रिशब्दः।तत्रयोगोद्वितीयपक्षोपन्यासेनदर्शितः।रूढि
श्चप्रथमपक्षोपन्यासेनतन्नैकस्यस्वीकारेसत्यन्यविषयंसू
त्रंतदनुग्राहकउदाहृतोन्यायश्चबाध्यतेनचयौगिकत्वेसतिशि
वव्रतापेतितिथ्यंतरेत्रयोदश्यादिशुशिवरात्रित्वंप्रसज्यतेति
वाच्यं।तस्यातिप्रसंगस्यरूढ्यानिवारणात्।यथापंकजशब्दपंक
जप्रीतइतियोगंस्वीकृत्यमंचकादिष्वतिप्रसंगारूढिस्वीकारेणनि ११९५
वार्यते।तद्वदत्रापियोगरूढ्यायोगेकाप्यतिप्रसंगोनचमुख्यसंभव
तिलक्षणाश्रयणमुचितं।अथोच्यतेलक्षणायाअनादिव्रतपरत्व
नस्यादितितत्रबहुव्रीहिस्वीकारेयोगेनवतसिद्धंशिवस्यप्रिया
रात्रिर्यस्मिन्व्रतेऽगत्वेनविहितानद्यतेशिवरात्र्याख्यंतस्मान्निर्मथ्य

न्यायेनात्रारूढःशिवरात्रिशब्दःतस्यचन्यायस्यसंग्राहकएकं
श्लोकःनिर्मथ्यौगिकोयोगरूढोवायोगमासनात्॥यौगिको
ऽचिरजातोग्नियत्रयोगरूढिनाकुअस्यायमर्थःइष्टकावे
यनंश्रूयतेनिर्मथ्यनेष्टकाःपचंतीतितत्रसंशयःकिमयंविमर्थ
शब्दोयौगिकःकिवायोगरूढइतिनिःशेषनॅणमुथ्यतेइतियोग
स्यप्रतीयमानत्वात्प्राक्षणीन्यायनयोगइतिपूर्वपक्षः।अत्रच
द्वावग्नीविद्येतेचिरनिर्मथितोचिरनिर्मथितश्चातत्रवपनोप
क्रमात्प्रागपिविमानोगारूपत्यानिरुध्यतोऽग्निराधानकालमार्थि
तलाञ्चिरनिर्मथितःवपनेप्रक्रम्याख्यानिर्मायतस्यामुख्यायांकं
चित्कालंवारणायायोग्निर्निर्मथ्यतेसाचिरनिर्मथितःतेनेष्टकाः
पच्यंतेतस्यवप्रत्यासन्नत्वात्तथाचमथनस्याग्निहितयसा

धारणेऽपि चिरं निर्मथितश्चेन्नियंतुरुद्विरा श्रयणीया यथा नाव
नीतेघृतमित्यचनवनीतजन्यत्वयोगस्य चिराचिरया सा
धारणेऽपि नूतनएव घृतेनावनीतराद्धा प्रसिध्यानिय के
म्यतेतद्वदत्रापि पवर्गगम्यंतथाव प्रतीयमानयोगस्या
परिहार्यत्वान्नित्यरूढिस्वीकारणाच्च योगरूढोऽयं निर्म
थ्यशब्द इतिसिद्धांतः। अनेन निर्मथ्यन्यायेन शिवरात्रि
राद्धापि योगरूढिराश्रियते। तत्र शिवस्य रात्रिः शिवरात्रि
रितितत्पुरुषसमासेनयोगेनप्रवर्तमानः शब्दरूढ्या
माघकृष्णचतुर्दशीरूपकालविशेषनियम्यते। शि
वरात्रिर्यस्मिन्व्रतइतिबहुव्रीहिसमासनयोगेनप्रव

तः शब्दरूढ्यावतविशेषनियम्यते। तच्च शिवरात्रिव्रतमेकाद
शीजन्यंतीव्रतवत्संयोगपृथक्त्वन्यायेननित्यकाम्यत्वेनद्वय
विधं। तत्रनित्यत्वमकरणप्रत्यवायहिंसानित्यनिश्चलरा
त्रेरवगंतव्यं। तत्राकरणप्रत्यवायः। स्कंदपुराणेपठ्यते। परा
त्परतरंनास्तिशिवरात्रिःपरात्परा। नपूजयतिनक्तंरुद्रं
त्रिभुवनेश्वरं। जंतुर्जन्मसहस्रेणभ्रमतेनात्रसंशयइति।
विप्रापितत्रैवविहिता। वर्षेवर्षेमहादेवंनरोनारीपतिव्रताः
शिवरात्रौमहादेवंकामंनक्तंप्रपूजयेदिति। नित्यनिश्चलरात्रे
तत्रैव। माघकृष्णचतुर्दश्यांयः शिवंनक्तमश्नीतव्रतः। मुमुक्षुः पूजय
न्नित्यंसलभेदाप्सितंफलमिति। अर्णवायदिवाशुष्यक्षियतेहि
मवानपि। मेरुमंदरलोकाश्चश्रीशैलाविंध्यएववाचलंत्यतेकदा

अक्षरणे
च

चिद्वै निश्चलंदृशिव्रतमिति। काम्यत्वंचफलश्रवणादवगंतव्यं।
तच्चस्कंदपुराणेपठ्यते। शिवंचपूजयित्वायोजागर्तिचतुर्दशी।
मातुःपयोधररसंनपिबेच्चकदाचन।यदीच्छेत्क्षयाभोगान्दिवि
देवमनोरमान्। आगमोक्तंविधिंकृत्वाप्राप्नोतिपरमंपदं।मम
नक्तंयेदिनिशारात्रिमुपोषकः।गणत्वमक्षयंदिव्यमक्षयंशि
वशासनं।सर्वान्सुकामहागान्नृतोनेहप्रजायतेकाम्यव्रतस्य नो
शानतंहितायांवर्षसंख्यापठ्यते।एवमेतद्व्रतंकुर्यात्प्रतिसंव
त्सरंव्रती।द्वादशाब्दिकमेकंस्याच्चतुर्विंशाब्दिकंतुवा।सर्वान्का ॥१९८॥
मानवाप्नोतिप्रेत्यचेहचमानवइति।नित्यकाम्यरूपंस्यास्यव्र १९९
तस्यसर्वाधिकारित्वमीशा-नसंहितायांयुक्तं॥शिवरात्रिव्र
तंनामसर्वपापप्रणाशनं।आचांडालमनुष्याणांशुद्धिमुक्ति

प्रदायकमितिअधिकारिनियमः।स्कंदपुराणेदर्शितः।माघमासेतुकृष्ण
याफाल्गुनस्यचतुर्दशी।सात्वपुण्यतिथिर्ज्ञेयासर्वपातकनाशिनी।अ
हिंसासत्यमक्रोधोब्रह्मचर्यंक्षमा।शौचमाक्रोधहीनश्चतपस्वीध्यान
सुदक्षोजितस्मेदयनिर्दंभोविगुरुपादानुगोयदि।अन्यथायोदद्यातीदंस
दानंरकंव्रजेदिति।उक्ताधिकारिणोऽनुष्ठेयव्रतस्वरूपंत्रिविधंउप
वासोजागरणंपूजाचेतदुक्तंनागरखंडे।उपवासंव्रतंतावन्नलादपिव
जागरात्।शिवेएवंस्थितेतस्यलिंगस्यापिचपूजयाअक्षयान्लो
क्यतेभोगान्शिवसायुज्यमनुयादिति।सह्यखंडे।स्वयंचलिंग
मभ्यर्च्यसोपवासःसजागरःअजानन्नपिनिष्पापोनिषादोगण
तांगतः।अत्रेदंविचार्यते।किमताउपवासजागरणपूजाव्रतस्वरूपे
विकल्प्यंते।उतसमुच्चीयंते।विकल्पंतेइतिप्राप्तंकृतेएकस्माच्च
तरनिरपेक्षतयाविधानात्।तथाहिस्कंदपुराणेकेवलउपवासवि

धिः पठ्यते। अखंडितत्रतीयादिशिवरात्रिमुपोषयेत् सर्वान्कामा
न्वाप्नोतिशिवेनसहमोदतइतितथाकेवलजागरणंपठ्यतेक
श्चिन्नुण्यविशेषणव्रतहीनोपियपुमान्। जागरकुरुतेव्रससद्दस
मतांव्रजेदिति। तथाकेवळपूजापठ्यतेयःपूजयतिनक्तंरामने
कफलतांव्रजेदिति। तस्मादुपवासादयःत्रयोपिविकल्पंतेयदि
नामरखंडसत्यखंडयोःसमुच्चीयविधिरस्तीत्युच्यतेतदिप्रत्य
कंवासमुदायोवायथेऽनुष्ठीयतामितिप्राप्तेब्रूमःविश्वानरा
धिकरणन्यायेनसमुदायएवात्रानुष्ठेयः। तस्यचनान्यायस्य ॥१७॥
संग्राहकावेतौश्लोकौनवतःविश्वानरमुपास्तेत्रप्रत्यकंसमुदायतः।
विकल्पःसमुदायोवानियतोहिविधातृविधेःकिंकल्पइतिचेन्ने
वंसमुदायप्रतीतेः। अवयुत्यानुवादेनप्रत्यकंप्युपपत्तितइति।
अयमर्थः। छंदोगेराम्नायतेवैश्वानरउपोस्तइति। विप्लुलाक्षादि

त्यवाग्वाकाशोदकपृथिवीरूपैःषड्विधवयवैरुपेतोऽवयवीसर्वा
त्मकोविराट्पुरुषोवैश्वानरशब्दवाच्यः। तत्रसंशयः। किंविध
लोकाद्यवयवावाअवयवीवाप्रत्यकंविकल्पेनोपास्याः। उतावि
यव्येवनियमेनोपास्यइति। विकल्पइतितावत्प्राप्तंकुतः। हिविध
स्यविधेःश्रूयमाणत्वात्। प्राचीनशालसत्ययज्ञइंद्रद्युम्नऽ
इंडविडोदालकनामभिःषड्भिर्महर्षिभिःक्रमेणविप्लुलाक्षादयः
षडेवचवाःप्रत्यकमुपासिताःतद्वत्तानुकथनपरेषुतत्रकोषुल्लाप
णामवयवानांप्रत्यकमुपासितियमविधयःफलसहिताःपठ्य
न्तेपुनश्चांतेषड्भ्यस्तेन्यामहर्षिभ्यःअश्वपतीराजासमु
दायोऽत्रोपास्तिमवाचत्। अतोहिविधविधिवेळेनयथेच्छवि
कल्पइतिप्राप्तेब्रूमः। समुदायएवात्रनियमेनोपास्यः। कुतःप्रस्त

तत्वात् अवयवोपास्तिवाक्यानित्ववद्युत्यानुवादरूपत्वेनोपपद्यते तस्मात्समुदायएवोपास्य इति सिद्धांतः अनेनन्यायेन प्रकृतेऽप्युपवासादीनांचयाणांसमुदायस्यैववृतस्वरूपत्वं ३२
ननुक्वचिदुपवासादित्रयंविधायपुनःपक्षांतररूपेणोपवासत्रयमतिरिक्तंदृश्यतेअथवाशिवरात्रिश्चपूजाजागरणैर्नयेदितिनायंदोषः अथवैतदनुकल्पेनपक्षमेणाशक्तविषयत्वोपपत्तेः अत्रवैतेविहितानांत्रयाणांपरस्परमंगांगिभावबोधकप्रमाणाभावात् आग्नेयादिषुजागरवत्प्रत्येककालसंबंधविधानात्फलसंबंधाच्चसमप्रधान्यंप्रष्टव्यं अस्यैवचोपवासस्यफलकालंगमभिधीयतेलुब्धकस्यनद्योश्चजन्मप्राप्तवतोदुर्वाससासहसैवोदपद्यतेकृत्स्नपक्षश्चतुर्दश्यांनविद्धिन्नमाप्तवान् अप्युपिप्राणरक्षणार्थंक्षुधासंपीडितोऽनसिदंतुपत्रंगमयन्धनुष्कोद्यद्गतान्येवबिल्वपत्राण्यपा

माणपतितानिमहाराजशंभोःशिरसिन्यतळेतत्रैवतदेकोराजेंद्रसर्वरात्रमतंद्रितःरात्रिशेषंस्थितोव्याधसद्दृष्टिरनामिषःप्रज्ञातविमलाजातेदृष्टांतत्रयंकरंबिल्वपत्रेद्विजश्रेष्ठकंदमूळंचपारितइतिएतस्मिन्यथोक्ततिथिनिर्णयेमिदंविचार्यते किंवतांतरेशिवरात्रापुदयास्तमयवेधआदर्तव्यः किंवापदोषवेधः अहोस्विन्निशीथवेधः तस्यव्रतांतरेषुत्कृष्टत्वात् इतिप्रथमेचपूर्वपक्षरूपत्वेनादशीवेधःपरेधरस्तमयदर्शवेधइतिउदयास्तमयवेधायुक्तःतस्यव्रतांतरेषुत्कृष्टत्वात् कृत्स्नस्यचकल्पाद्दीयस्त्वात् एवंसामान्यादिशेषस्यबलीयस्त्वात्॥ सामान्यरूपोह्युदयास्तमयवेधःसर्वतिथिषुसामान्यात् विशेषरूपोप्रदोषनिशीथवेधोकृत्स्नव्रतुर्दशीलक्षणतिथिविशेष

शिवरात्र्याख्यं व्रतविशेषमुपजीव्य प्रवृत्तत्वात् एतदेवाभिप्रेत्य ज्ञानसंहितायामुक्तोदयान्विता कार्या त्रयोदश्यन्विता चेति। अस्मिन्व्रते प्रदोषनिशीथौ व्याप्तौ पुराणेदर्शितौ। त्रयोदश्यां गोसहस्रं चतसृषु नाडिषु। तत्र विद्धानुयातत्र शिवरात्रिव्रतं चरेदिति स्मृत्यन्तरेऽपि। प्रदोषव्यापिनीग्राह्या शिवरात्रिचतुर्दशी। रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेदिति कामिकेऽपि। आदित्यास्तमयकाले अस्ति चेद्या चतुर्दशी। शिवरात्रिव्रतं तत्र सोऽश्नमेधफलं लभेदिति स्मृत्यन्तरेऽपि। नवेद्यत्र त्रयोदश्यौ न्यूनव्याप्तामहानिशौ। शिवरात्रिव्रतं कुर्यात् कुर्याज्जागरणं तथेति। इशानसंहितायां तु। माघकृष्णचतुर्दश्यामादिदेवो महानिशि। शिव

लिंगतयोद्भूतः कोटिसूर्यसमप्रभः। तत्कालव्यापिनीग्राह्या शिवरात्रिव्रते तिथिः। अर्धरात्रात्परश्चेद्वै युक्ता यत्र चतुर्दशी। तत्तिथावेव कुर्वीत शिवरात्रिव्रतं बुधः। अर्धरात्रादधश्चार्द्धं युक्ता यत्र चतुर्दशी। नैवतत्र व्रतं कुर्यात् पुत्रान्हन्ति यतो हि सा। व्याप्तौ रात्रेर्यस्यां तुलभ्यते सा चतुर्दशी। तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैः। पूर्वेद्युः परेद्युर्वा मिश्रा निशि चतुर्दशी। व्याप्ता सादृश्यतो यस्यां तस्यां कुर्याद्व्रतं नरः। लिंगाविर्भावकालेतु व्याप्ता ग्राह्या चतुर्दशी। तद्वियोगान्विता तूता सा कार्या जंतुभिर्निसदा। मम प्रियकरी ह्येषा माघकृष्णचतुर्दशी। महानिशान्विता यातु तत्र कुर्यादिदं व्रतमिति। एवं सति पूर्वेद्युरपरेद्युर्वा यत्र प्रदोषनिशीथौ न व्याप्तिस्तत्र व्रतमावरणीया पूर्वेद्यु

वोनयव्याप्तौ स्कंदपुराणेपठ्यतेत्र योदशीयदादेविदिनद्युत्तिप्रमा
णतःजागरेशिवरात्रिःस्यान्निशिपूर्णाचतुर्दशी।दिनद्युत्तिरस्त
मयूःपरेह्नेरवोनयाव्याप्तीकामिकेपठ्यते।निशाद्वयंचतुर्दश्यां
पूर्वोयाज्यापरास्तुनेति।दिनद्वयेपुनयव्याप्यनावेतिनसं
शोव्यते।यामद्वयंक्षपस्यैनावात्।एकस्मिन्दिनएकंव्या
प्तौतुकथमितिचेदुच्यतेःसाह्यवत्प्रसज्यतेपूर्वेह्नेनिशीथ
व्याप्तिःपरेह्नेवप्रदोषव्याप्तिरिति।तत्रैकव्याप्तदिनद्वयस
मानत्वेपिजयोयोगस्यप्रशस्तत्वंचनकेवचनेरादृतत्वा
दवगम्यते।तथास्कंदपुराणेपठ्यते।कृष्णाष्टमीस्कंदषष्ठीशि
वरात्रिश्चतुर्दशी।एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणंनवे
त्।जन्माष्टमीरोहिणीचशिवरात्रिस्तथैवच।पूर्वविद्धैवकर्त्त

DR BHAU DAJI

व्यातिथिर्ज्ञातेवपारणं।श्रावणीदुर्गानवमीनथाष्टमीच
या।पूर्वविद्धाकर्त्तव्याशिवरात्रिर्बलेर्दिनंजयंतीशिवरा
त्रिश्चकोयंनद्राजयानितेति।नागरखंडेमाघफाल्गुनयोर्म
ध्येऽसितायाचतुर्दशी।अनंगेनसमायुक्ताकर्त्तव्यासातदाति
थिरिति।ब्रह्मवैवर्त्तेतुदृश्यतेपुसर्वपुकर्त्तव्यासंमुखीतिथिःअन्य
षुव्रतकल्पेषुपूर्वयुक्तामुपावसेदिति।दर्शयोगनिदानेस्कंदपुराणेद
र्शितामेतामपिपापानाद्दृष्ट्वेनिकृतिःपुरानद्दृष्टाकुर्वंतिपुसां
कुहूयुक्तीतिथिंशिवांमिति।अन्यान्यपियानिविद्दर्शयोगनिदा
वचनानितत्रतत्रसम्यंतेतानिसर्वाण्यस्मिन्विषयेयोजयितं
व्यानियदापूर्वेद्युर्निशीथाद्ध्वंप्रवृत्ताचतुर्दशीपरेह्नक्षयवशा
न्निशीथादर्वागेवसमाप्तातदापूर्वेह्नःप्रदोषनिशीथव्याप्त्योरन

योरप्यसंभवात्। परेद्युः प्रदोषव्याप्तेरेकस्याः सद्भावाच्च पर
विद्धैव ग्राह्या। एतदेवाभिप्रेत्यस्मर्यते। माघासितेन्दुदिनकदाचि
दुपैतियोगंयदिपंचदश्यां जयाप्रयुक्तोनतुजातकुर्यात्शिव
स्यरात्रिंप्रियकृच्छिवस्यति। यदापूर्वेद्युः प्रदोषाद्ध्यर्धप्रवृत्तावे
तुदर्शीपरेद्युः क्षयवशात्प्रदोषादर्वागेवसमाप्तौतदापरेद्यु
र्व्याप्तिद्वयाभावात्पूर्वेद्युर्निशीथव्याप्तेःसद्भावात्। जयायोगा
च्चपूर्वेद्युरुपवासः अत्रायंविवेकः संपन्नादिनद्वयेनिशीथव्या
प्तौतद्व्याप्तौचनिशीथव्याप्तिर्नियामिका।तथादिनद्वयेपिप्र
दोषव्याप्तौतद्व्याप्तौचनिशीथव्याप्तिर्नियामिका। एकैकस्मिन् ।।२०१।।
दिनेएकैकव्याप्तौयोज्यं योगोनियामिकइतिः।अस्यनिशिवरात्रिव्रत
स्याहोरात्रसाध्यत्वेनाहनिरात्रौचसंबंधसाधारणसत्यहर्वधमु

पेक्ष्यप्रदोषनिशीथयोरेवकुतः शास्त्रांणापक्षपातइतिचेत्।
रात्रेस्तत्रप्रधानत्वादितिब्रूमः तत्राधान्येचोपपत्तिःस्कंदपु
राणेपठ्यते। निशिनृत्तंतिचूतानिशक्तयःशूलनृत्यतः। अतस्तस्यां
चस्यायोदश्यांसत्यांतत्पूजनंकुर्वदितितस्यांत्रयोदश्यामित्या
धिकरणेसप्तम्यांतथाचायमर्थःसंपद्यतेत्रयोदशीदिनेनिशीथत ।।२।
स्यं।चतुर्दश्यांविद्यमानायांशिवपूजनंकुर्वदितिनागरखंडेमा
घमासस्यकृष्णायांचतुर्दश्यांसुरेश्वरि।अहंयास्यामिनूपृष्ठरा
त्रौनेवदिवाकलौ। लिंगेशुचसमस्तेषुतिथिर्यासिकाचतत्रसूर्यो
दयमारभ्यप्रवृत्तापरदिनोदयपर्यंतंकथितातिमिका।चरपूर्वो
वरेषुचासंभविष्यामयंदिग्धवर्षपापविमुद्रयातस्यांरात्रौहिमपू
जायःकरिष्यतिमानवः। मंत्रैरेतःसुरश्रेष्ठविपापःसंभविष्यति।सावे
शिवरात्रिचतुर्दशीत्रिविधानवेधिकतिथ्यात्मिकातिथिद्व्यात्मिका

योरप्यसंभवात्। परेद्युः प्रदोषव्याप्तेरेकस्याः सद्भावाच्च पर
विद्धैव ग्राह्या। एतदेवाभिप्रेत्यस्मर्यते। माघासितेतरे दिनैकदाचि
दुपैति योगो यदि पंचदश्यां जया प्रयुक्तो न तु जातु कुर्यात्। शिव
स्य रात्रिं प्रियकृच्छिवस्य। इति। यदा पूर्वेद्युः प्रदोषाद्ध्वं प्रवृत्तौ च
तुर्दशी। परेद्युः क्षयवशात्प्रदोषादर्वागेव समाप्तौ। तदा परेद्यु
र्व्याप्तिद्वयाभावात्। पूर्वेद्युर्निशीथव्याप्तेः सद्भावात्। जयायोगा
च्चपूर्वेद्युरुपवासः। अत्रायं विवेकः। संपन्नादिनद्वयेनिशीथव्या
प्तौ। तद्व्याप्तौ च निशीथव्याप्तिर्नियामिका। तथा दिनद्वयेऽपि प्र
दोषव्याप्तौ। तद्व्याप्तौ च निशीथव्याप्तिर्नियामिका। एकैकस्मिन् ।।२०१।।
दिनेऽप्येकैकव्याप्तौ योज्यं योगो नियामिकेति। अस्यां शिवरात्रिव्रत
स्याहोरात्रसाध्यत्वेनाहोरात्रोचसंबंधसाधारणेसत्यहर्वैधमु

पेक्ष्य प्रदोषनिशीथयोरेवकुतः शास्त्रांणा पक्षपात इतिचेत्।
रात्रेस्तत्रप्रधानत्वादितिब्रूमः तत्प्राधान्येचोपपत्तिः स्कंदपु
राणेपठ्यते। निशिन्नमंतिचूतानि शक्तयःशूलनघतः। अतस्तस्यां
चस्यादश्यासंतत्पूजनंनवेदिति। तस्यांचयादृश्यामित्या
धिकरणेसप्तम्यातथाचायमर्थः संपद्यते। चयादृशीदिनेनिशीथत ।।२।
स्यां। चतुर्दश्यांविद्यमानायांशिवपूजनंनवेदिति। नागरखंडेमा
घमासस्यकृष्णायांचतुर्दश्यांसुरेश्वरि। अहंयास्यामिनूपृष्ठरा
त्रौनेवदिवाकलौ। लिंगेचसमस्तपुण्यतिथिचयस्तिमिका। तत्रसूर्यो
दयमारभ्यप्रवृत्तापरदिनोदयपर्यंतंकृष्णा। तिमिका। चरपृष्ठा
वरेषुचासंक्रमिष्यामिसंदिग्धंवर्षपापविशुद्धयेतस्यांरात्रौहिमपू
जायःकरिष्यतिमानवः। मंत्रैरेतैःसुरश्रेष्ठविपापःसंभविष्यति। सावे
शिवरात्रिचतुर्दशीत्रिविधानवतिकतिथ्यात्मिका। तिथिद्वयात्मिका

तिथित्रयात्मिकाचात्रसूर्योदयमारभ्यप्रवृत्तापरदिनोदय
पर्यंतैकतिथ्यात्मिका। सावधदोषानावात्रशास्त्रातिथिद्वयात्म
कत्वंचेद्धानवति।जयायोगेनादर्शयोगेनचात्रतत्रयोगद्वय
मेकैकस्मिन्विषयप्रशस्तंसचविशेषःपूर्वमेवोदाहृतः।ति
थित्रयात्मिकत्वंचतिप्रशस्तं।एतदेवाग्निपुराणेपठ्यते।
त्रयोदशीकलाप्येकामध्यंचेच्चतुर्दशी।अंतेचैवनिशीवाली
निस्पृश्यांशिवमर्चयेदिति।यथात्रिस्पृशाप्रशस्ततथावारवि
शेषेणयोगविशेषणचप्रशस्तानवति।स्कंदपुराणेपठ्यते।मा ॥२०२॥
घकृष्णचतुर्दश्यांरविवारायदाभवेत्।नोमावापिनवेद्विकर्त्त
व्यंव्रतमुत्तमं।शिवयोगस्ययोगवतद्वदुत्तमोत्तमं।शिवरात्रि
व्रतंचेत्तत्रचदुत्तमोत्तममिति।ननुयदापूर्वविद्धायामुपवास

स्तदापरेद्युःकितिथ्यतेपारणमुतातिथिमध्येःशास्त्रेतुपक्ष
द्वयेपिसमानंतत्रतिथ्यंतेपारणवचनानिपूर्वमुदाहृतानि।
तिथिमध्यपारणवचनंस्कंदपुराणेपठ्यते।उपोषणचतुर्द
श्यांचतुर्दश्यांतुपारणं।कृतेसुकृतलक्षेश्चलत्यतेवाथ
पारणेपृ० वानवा।ब्रह्मास्वयंचतुर्वक्त्रैःपंचवक्त्रस्तथाप्यहं।सिक्थेसि
क्थफलंतस्यशक्तोह्येवंपावति।ब्रह्मांडोदरमध्येतुयानि
तीर्थानिसंतिवैसांस्थितानिभवंतीहव्रतायांपारणंकृ
तेतिथिनोमेवसर्वासामुपवासव्रतादिषुःतिथ्यंतेपा
रणंकुर्यादिनाशिवचतुर्दशीमितिवाढं।अस्तिद्विविध
शास्त्रं।तस्यचद्विविधशास्त्रस्यप्रतिपत्तिकरणीकन्या
येनव्यवस्थादृष्टव्या।यदायामत्रयादर्शेवचतुर्दशी

परिसमाप्यतेतिथ्यंतेपारणंयदाचतुर्दशीयामत्रयम
तिक्रामतितदाचतुर्दशीमध्येपूर्वाह्णेकुर्यात्॥इति॥
चतुर्दशीनिर्णयः॥अथपंचदशीनिर्णयः॥साचद्विविधा च
पौर्णमासीअमावास्याच॥तत्रपौर्णमास्यांपरस्परविरु
द्धानिवाक्यान्युपलभ्यते॥तत्रपूर्वविद्धायांग्राह्यत्वंविरुधर्मो
त्तरे॥एकादश्यष्टमीषष्ठीपौर्णमासीचतुर्दशीअमास्यात वा
तीयाचउपोष्याःसुपरान्विताःपरविद्धानिषेधःपूर्वविद्धा
विष्णुब्रह्मपुराणयोःपरविद्धाकादश्यमावास्या
पूर्वविद्धातथाष्टमीपूर्णिमापरविद्धाचनोपोष्यतिथिपर्वक ॥२०२॥
पूर्वविद्धातुकर्तव्यासप्तमीवृद्धिनिर्णयेपौर्णमासीमहीपाल
पुराणेनिश्चयंगतेतिपूर्वविद्धाग्राह्यत्वंचयुग्मवाक्येचतुर्दश्याच
पूर्णिमेतिएवंपरस्परविरोधेसतिव्यवस्थाब्रह्म[illegible]वव

र्तव्यानिशिता॥तत्रविद्धानकर्त्तव्याअमावास्यावपूर्णिमावजीयित्वा
मुनिश्रेष्ठसावित्रीव्रतमुत्तमम्॥इति॥सावित्र्योराजकन्यायांपौ
र्णमासावित्रीव्रतंतद्वदुविष्यत्तरेदर्शितं॥कथयामिकुलस्त्रीणा
महिम्नोवर्द्धनंपरं॥यथावीर्णव्रतंपुण्यंसावित्र्याराजकन्य
येति॥एतच्चपौर्णमास्यामावास्यायांचविहितं॥तस्मिन्व्रतेपूर्व
विद्धाग्राह्यव्रतांतरेपूर्वविद्धानकर्त्तव्याकिंतुपरविद्धैवकर्त्तव्ये
तिपरस्परविरुद्धस्यशास्त्रद्वयस्यव्यवस्थायदाचतुर्दश्यष्ट
दशनाडीरुपरितनदासावित्रीव्रतमपितत्रपरित्याज्यं॥तोष्टा
दशनाडीभिर्दृषयेत्युत्तरांतिथिमितिस्मृतेर्योयंपौर्णमासी
निर्णयःसएवामावास्यायाप्यवगंतव्यः॥तत्रापिसावित्रीव्र
तंपूर्वदिनेकर्त्तव्यंव्रतांतरंतूत्तरदिनेअस्यांचव्यवस्थायां
ब्रह्मवैवर्तेपूर्वमुदाहृतंस्कंदपुराणेपिनूतविद्धासिनीवाली

नतव्रतंचरेत्। वर्जयित्वातुसावित्रीव्रतंचत्रिरात्रिवाहेति। एवं
वसतियुग्मशास्त्रं सावित्रिव्रतव्यतिरिक्तेषुव्रतेषुद्रष्टव्यंतथा
च प्रवेताअपि। नागविद्धातुयाषष्ठीसप्तम्यावतथाष्टमीदश
म्येकादशीविद्धात्रयोदश्यावतुद्वयी। ऋतविद्धाप्यमावास्या
न ग्राह्यामुनिपुंगवैः उत्तरोत्तरविद्धास्तःकर्त्तव्याःकाठकीश्रु
तिरिति। पद्मपुराणेपि। षष्ठ्यष्टमीतथादशीःकलपक्षत्रयोदशी
एताःपरयुताःपूज्याःपराःपूर्वणसंयुताइतिस्मनुनारदीपुराणे।
दर्शेचपूर्णमासेचपितुःसांवत्सरंदिने। पूर्वविद्धामकुर्वीणान
रकंप्रतिपद्यतइति। तत्सावित्रीव्रतविषयंश्राद्धविषयंवा। ॥२०४॥
अमावास्यायामिवपौर्णमास्यामपिश्राद्धंविहितं। तथाचपि
तामहः। अमावास्याव्यतीपातपौर्णमास्यष्टकासुच। विद्वान्
श्राद्धमकुर्वाणःप्रायश्चित्तीयतेहिसइति। व्यासोपि। न निर्व

पतियःश्राद्धंप्रमीतपितृको द्विजः। इंदुक्षयमासिमासिप्राप्य
श्चीत्तीयतेहिसः। अमावास्याश्राद्धस्यपार्वणरूपत्वेअप
राह्णस्यतत्कर्मकालत्वकुतपस्यप्राप्तंकालत्वमित्येतत्त्रि
तयंप्रतिपत्त्रकरणेप्रत्युद्धिकनिर्णयप्रपाचतं। तथसत्यप
राह्णस्यमुख्यकर्मकालत्वात्पूर्वेद्युरेवापराह्ण्याप्यन्य
मावास्यागृहीतव्या। तत्रापराह्ण्यापिन्याःपूर्वतिथेःग्राह्यता
माह्यहारीतः। यस्यांसंध्यागतःसोमोमृणालमिवदृश्यते।
अपराह्णेतुयात्तस्यांपिंडानांकरणंक्रवमिति। यत्तुकाश्यजि
निनोक्तं। ऋतुविद्धाममावास्यांमोहादज्ञानतोपिवा। श्राद्धक
र्मणियकुर्यस्तेषामायुःप्रहीयतइति। तदापराह्ण्याव्यन्यत्र
विषयंद्रष्टव्यं। अपराह्ण्यापिन्याऽउत्तरतिथर्ग्राह्यतामाहाहा

रीतः। अपराह्णःपित्र्यंतुयापराह्णव्याप्तिनी। सायाह्नःपित्र्यकार्ये
तुनपूर्वास्तावुयाप्तिनीति। उभयत्रापराह्णव्याप्तित्वंहेधाभिधी
तोएकदेशानस्पर्शनेचेति। एवादेशव्याप्तिश्चेद्धाभिधीतविषम्ये
णसाम्यनचेति। तत्रविषम्येणादेशव्याप्तीमहत्त्वनिर्णेतव्यं। तथाचस्मृतिः। अपराह्णेहयग्याप्यन्यस्मावास्यायां
क्षवेतत्रात्यंतत्वहत्त्वाभ्यांनिर्णयःपित्र्यकर्मणीतिमा
हुर्यास्त्यप्यपायः सचशिवरात्रेर्वसंवादेस्पष्टमभि
हितः। अत्यापराह्णेयाद्यासायाह्नास्यादधिकाभवे
दिति। साम्येनैकदेशव्याप्तौखर्वादित्वंनिर्णयः॥ ११२५॥
नोभयत्रैकदेशव्याप्तिश्चेत्तिथिगतेरेवहेत्वसाम्ये
सेधाभिधीयते। तथाहि। पूर्वेद्युरपराह्णस्यद्वितीयघटि
कामारभ्यपरेद्युरपराह्णस्यचरमघटिकांहित्वासर्व

त्रासुपंचघटीकासुयदातिथिर्वर्त्तत। तदापूर्वापराह्णस्य
प्रथमघटिकाद्वितीयापराह्णचरमघटिकाचेविहायनि
शासुपंचसुवर्तमानत्वात्साम्येनैकदेशव्याप्तिर्नवीतितिथि
श्चेत्तदाघटिकाचतुष्टयेनवर्द्धतेतदापूर्वापराह्णस्यचरम
घटिकायांउत्तरापराह्णस्यप्रथमघटिकायांवर्त्ततेतदापि
साम्येनैकदेशव्याप्तिर्नवर्तीतिघटिकाचतुष्टयेनतथातिथिःक्षी
यतेयदापूर्वापराह्णस्यचरमघटिकात्रयद्वितीयापराह्णस्य
प्रथमघटिकात्रयंतदासाम्यैकदेशव्याप्तिस्तदवस्थातिथिस्त
न वर्द्धतेनापिक्षीयतेकिंतुसमेवेदृशविषयेखर्वदर्पवाक्या
न्निर्णयः। तच्चखर्वादिवाक्यंसर्वतिथिसाधारण्येनप्रवृत्तत्वा
दमावास्यायामपिप्रवर्त्ततेतथामावास्यायामपिविशेषान्नि

वराध्वसंवादेसएवदृश्यते॥अमावास्यातुसादृश्यमस्मि
न्दिनेक्षणसिनीवालीसंसृष्टास्यादपराह्णदर्शेसमाक्षयेपूर्वोप
राह्णोसाम्येपिवपरास्मृतेतिस्मृत्यन्तरेपि॥तिथिक्षयेसिनीवा
लीतिथिवृद्धौकुहूर्मता॥साम्येपिवकुहूर्ज्ञेयावेदवेदागवेदिभि
तिवतुर्दशीमिश्रासिनीवालीप्रतिपन्मिश्राकुहूः॥तथाचव्यासः॥
दृष्टचंद्रासिनीवालीनष्टचंद्राकुहूःस्मृतेति॥कात्यायनोपयंचा
पराह्णव्याप्तावपितिथिवृद्धौत्वकुहूरेवग्राह्यायदादिनद्वय
यपराह्णनस्पृशतितदासाग्न्यग्निकर्मदेनव्यवस्थादृष्ट
यातदाहशंखावर्तिः॥अपराह्णहयाव्याप्तियदिदर्शस्तिथि
क्षयो॥आहिताग्नेःसिनीवालितिनिरग्न्यादकुहूमत
ति॥आदित्यपुराणेपिक्षयेपूर्वेतथोत्तरेसाग्निकैःपित्र्यकर्मणि॥स्मृति

अमावास्या १०

सूत्रैःकुहूःकार्यातथाचानग्निकैर्हविरिति॥एवंशास्त्रार्थव्य
वस्थितेसतियान्यनेकविधानिवचनानि॥सर्वाण्यपि
तेषुमाद्यास्याभेदेनन्यतमविषयत्वेनयथायोग्यं यो
जनीयानितथाहि॥तत्रतावद्वौधायनआहामध्याह्नात्परतोय
त्रचतुर्दश्यतुवर्ततेसिनीवालीतुसाज्ञेयापित्र्यंतुनिष्फ
लेति॥बृहस्पतिरपिमध्याह्नात्पमावास्यापरस्तात्संप्रव
र्त्ततेऽतस्तद्विद्धातुसाज्ञेयानसायंचदर्शेनिवेदिति॥अत्रमध्या
ह्नाद्ध्वमपराह्णमतिक्रम्यपरस्तादमावास्याप्रवर्त्ततइतिव्याख्या
यांतदेवतद्ध्वनंपरेद्युरेवापराह्णव्याप्तौयोजनीयं॥यत्तुका
त्यायनवचनंपिंड्यान्वाहार्यकंश्राद्धंक्षीणेराजनिशास्पतावास
रस्तृतीयंनोनातिसंध्यासमीपइतिपिंड्यानापिंडपित्र्ययज्ञागरू

तानामनुपश्चाद्दीयते क्रियत इतिपिंडान्वाहार्यकं श्राद्धं मम
वास्यां यां तत्क्षीणेराजनीदौ कर्त्तव्यं वासरस्यतृतीयेशइत्य
नेचैषन्यूनापरालः सायान्हसद्दितोभिधीयते तत्रतातिसं
ध्यासमीपत इति सायाह्नस्यप्रतिषेधेसत्यपराह्नः कर्मकाल
त्वेन परिशिष्यते तथाचकर्मकालव्यापिनीतिथिर्ग्राह्येयु
क्तं तत्रेदक्षयुग्यचतुर्दश्याअष्टमप्रहरेप्रारंभःअमावा
स्यायाःसप्तमेप्रहरेसमाप्तिःतदेतदुनयंकात्यायनएवा
हअष्टमेशेचतुर्दश्याःक्षीणेनवतिचंद्रमाःअमावास्याष्ट
मासचपुनःकिलनवेदप्युरितिायनुजाबालिनोक्तं प्रतिपद्य
प्पमावास्यापूर्वाह्नव्यापितीयदिनृतविद्धेवसाकार्यापित्र्य
कर्मणिसदेतिअत्रपूर्वाह्नव्यापिनीतिविशेषकथनादप
राह्नव्यापिलेनास्तीतिगम्यते तादृशीचद्विविधापूर्वेद्युरपराह्नव्या

चंद्रदर्शना
त्र.

पिनीतइहतावत्आद्यपक्षेसर्वैरपिनृतविद्धाकार्यादितृती
यपक्षेसाग्निकैरवश्यंनृतविद्धाकार्या तच्चहारीतनोक्तं पूर्वाह्ने
चेदमावास्याअपराह्नेचेदनुसाप्रतिपद्यप्येवंचैकर्त्तव्येश्राद्धं
श्राद्धविदोविदुरितितद्दिनद्वयेप्यपराह्नव्यापित्वानावसतिनिर
ग्निकविषयं यदपिहारीतनोक्तं नृतविद्धापमावास्याप्रति
पन्मिश्रितापिवापित्र्यकर्मणिविद्धेयाद्याकुतपकालिकी
तितदेकोद्दिष्टविषयं एकोद्दिष्टस्यकुतपप्राधान्यंप्रतिपत्प्र
करणेप्रपंचितंयदाप्रतिपन्मिश्रायांअपराह्नव्याप्तौपार्वणे
वमुख्यःकल्पःकुतपव्याप्तिरनुकल्पःतथावमुख्यासंभवेअनु
कल्पस्योपादेयत्वात् निरग्निकःप्रतिपन्मिश्रागृहीतुंशक्यानृ
तविद्धायांतुकुतपकालिकत्वेसत्यापराह्निकत्वमर्थसिद्धं

तथा सतिमुख्यानुकल्पयोरुभयोरपि सङ्गवानुकुतपस्य
प्रारंभकालत्वाच्च प्रत्याब्दिकप्रकरणादाहृतदेवस्वामिवच्च
नानुसारेणकर्मोपसंहारकालव्याप्तिर्दर्शिता नवति।तच्चा
त्रदृष्टांतत्वेनोपन्यस्यतेयथाकुतव्यापिनीन्यूनविद्धोपाद
यातथाप्रतिपद्विद्धापिकुतपव्याह्यापादयाह्नवतिय
त्रैवबौधायनआह।घटिकाद्वयंमावास्याप्रतिपत्सुन
चेत्तदाऽन्यूनविद्धैवसाग्राह्यादेवपित्र्यंचकर्मणीतिप्रतिप
त्सुघटिकाद्वयंपिकर्मकालसंबंधिनीयदिनस्यादित्यर्थः।त ११२०॥
देतद्वचनंपूर्वघटेवापराह्णव्याप्तौदृष्टव्यंअस्मिन्नेवविष
येजाबालिराह।प्रतिपद्युप्यमावास्यापूर्वाह्णव्यापिनीयदिन्यून
विद्धैवसाग्राह्यापिष्टकर्मणिसर्वदेतियत्तुहारीतवचनाकन्या

मकरमीनेषुतुलायांमिथुनेतथाऽन्यूनविद्धैवसर्वेषांएज्यानव
तियत्नइति।तद्व्रतविषयंतथाजाबालिः।तुलायांमकरेमीने
कन्यायांमिथुनेतथाऽन्यूनविद्धाव्रतेयाह्याशेषेतुप्रतिपद्धने
ति॥इतिपंचदशीनिर्णयः॥अथेष्टिकालोनिर्णीयते।नचेष्टेः
प्रतिपदिकर्त्तव्यतयापूर्वप्रकरणएवकृतोयंनान्निहितइति
शंकनीयंपर्वविप्लुतौशास्यापिप्रतिपदइवेष्टिकालत्वात्।
पर्वप्रतिपत्संधिसापेक्षत्वाच्च।अतःपर्वनिर्णयानंतरमस्यावं
सरइतिइदानींनिर्णीयते।तत्रेदंचिंत्यते।किंपर्वप्रतिपदोः
संधिरिष्टिकालः।किंवासंधेर्ऊर्ध्वोपार्श्वेविति।तदर्थंप्रथम
संधिस्वरूपंनिरूपणीयंनिरूपणेचपर्वणोदाधीनंअतःपर्व
णोदानिरूप्यते।पर्वचद्विविधंपौर्णमास्यमावास्याचतिथ

नुप्रतिपद्मारभ्य चतुर्दश्यंतानां तिथीनां शुक्ल
पक्षयोर्नास्ति भेदः। पंचदश्यंतु किमर्थं येनाम
भेदइतिचेत्। तयोरपि स्वभावतापनायेतिब्रूमः। अम
यमद्वितीयादीनां चंद्रकलानां भेद्यसंख्याकलाक
लावद्भेदात्संख्यया शुक्लैकतिथिर्व्यवह्रियते कृ
ष्णपक्षे क्षीयमाणायाः तस्याः कलायानाम्नानतिथेव्य
वहारः। तेनन्यायेनात्यतिथेरपि पक्षद्वये पंचदशीत्येवव्य ॥२०९
वहारः तत्र शुक्लायां पंचदश्यां चंद्रमंडलं स्वकलाभिः सर्वा
भिरापूर्यते सेयं मंडलपरिपूर्त्तिः पूर्णिमेत्यनेनाम्नायते।
तदेतदुक्तं ब्रह्माण्डपुराणमत्स्यपुराणयोः कलाक्षयव्यतिक्रां

ते दिवा पूर्णोपरस्यरं चंद्रादित्यौपराह्णेतु पूर्णत्वापूर्णिमा
स्मृतेति। अह्नः परोभागः पराह्णः सूर्यास्तमयकालइत्य
र्थः। तत्रयथादित्यः संपूर्णमंडलः सन्नुदारितिदृष्टांतदार्ष्टांतिकभावं
विवक्षित्वाह योरादित्यचंद्रयोरुपन्यासः यथामंडलपूर्ण
त्वविवक्षयापौर्णमासीशब्दः प्रयुज्यते। तदुक्तंभविष्योत्तरे
पौर्णमासीमहाराजसोमस्यदयितातिथिः पौर्णमासीत्वे
द्यस्मात्पौर्णमासीततःस्मृतेति। पौर्णमास्यमावास्ययो
र्विकल्पेयन्मासांतत्वंमासप्रस्तावदर्शितं अमावास्ये
त्यनेननाम्नावक्तव्यार्थः कथ्यते। तत्रामावास्यस्यत्वारार्थः
सहनावः कन्यासूर्यरश्मिः चंद्रकलावेतिवसुनाद्यस्यचत्वा

रोर्थः। इंद्रश्चंद्रः पितृविशेषो निवासश्चेति तत्र सह भावो वा नि
नमा शब्द इंद्रो वा चिनोतेर्वसुशब्दवत्परिकृत्य निर्वचनमेव
प्रवर्त्तते अमावसुरस्यां स्तोत्यमावास्येति। अयमर्थः। वृत्र
वधानंतरं प्रेषितेंद्रे समागमे संतुष्टदेवाः परस्परमेवं
वंतअद्यास्माभिः सहायमिंद्रो निवसतीति। अतस्तस्यदि
नस्यामावास्यात्वमिति। अयमर्थः। श्रुतपथब्राह्मणेदृश्यते
वैर्णमास्येवा अब्रुवन्नहमावा इमान्वसुर्वसतीयान्नः
प्रावात्सीदिति। तैत्तिरीयब्राह्मणेपिस्पष्टमयमेवार्थः श्रूयते
इंद्रोवृत्रंहत्वा परांपरावतमगच्छदपराधमितिमन्यमानस्तं
देवताप्रेषमैच्छन्नित्यारभ्यपठ्यते। सामावास्यांप्रत्यागच्छन्तंदेवा
मिसमागच्छन्त अमावैनोयवसुवसतीतींद्रोहिदेवानांवसुतद

मावास्यायाअमास्यात्वमिति। परावतमत्यंतदूरदेशमि
त्यर्थः। अपराधद्रोहमकार्षीयदावसुशब्दश्चंद्रवाचीतदाप
माशब्दस्यसहभावमेवोररीकृत्यैवनिर्णेतव्यंऽन्यथोभिः
सहचंद्रोवसत्यस्यांरात्रावितिअमावास्यासोयमर्थः श्रूयत
पथब्राह्मणेश्रूयतेएषवैसोमोराजादेवानामन्नंयच्चंद्रमाःस
यत्रैषएषांरात्रिंनपरस्तान्नपश्चादुदेतीदमेवैकमागच्छति
तदाहुःपश्चोषधीरनुप्रविशतिसर्वेदेवानांवस्वन्नह्येषांतारात्रि
मिहामावसतितस्मादमावास्यानामेतितथाबृहदारण्यकेचंद्रं
प्रकृत्यपठ्यते। सामावास्यांरात्रिमेतयाषोडश्यांकलायामश्चमि
दंप्राणन्नुदनुप्रविशयततःप्रातर्जायेतेतिअमावसुशब्दोय
दाकन्यापितृयाचिनोतिदानीमेवंनिर्वक्तव्यंअमावसुमे

ऊ द स्यां रात्रा वित्य मावा स्याअ मा रात्र त्ति धेया का वित्क न्या :
त स्यां रात्रौ वसु ना मानं पितरं व व्र सत्य पिता धर्मलो पाद्गीतः स
न् तां कन्या कां ने ख त् सा य मि तिहा सः प द्म पुराणे व र्णि त व्यः
अ मा व सु रात्र्या यदा सूर्यर श्मि नि वा स वा वि नो त दा त दनु सा र
णा नि र्व च नं स्कां दे ना गर ख ड पठ्यते अ मा ना म र वे रा श्मिः
स हस्र प्र मु खः स्मृतः य स्या श्चे त ज सा सूर्यः प्रो क्त स्त्रै लो क्य
दी प क : त स्मि न्वि स ति ये नें दु र मा वा स्या त त : स्मृ ते ति ब्र ह्म ड ॥२११॥
पु रा णे पि अ मा ना म र वे र श्मि श्च द्र लो के प्र ति ष्ठि ता त स्या त्सो
मा व स्त त स्या म मा वा सा त त : स्मृ त ति अ मा व सु रात्र्या : स ह ना
व नि वा स वा यि त्व मा श्रि त्य सं म त्स्य वा यु ब्र ह्मा दि पु रा णे षु नि र्व च नं
कृ त अ मा व स्ता त्र क्षे तु य दा चं द्र दि वा क रौ ए षा पं च द श्यो रा

त्रि र मा वा स्या त त : स्मृ ते ति अ मा रात्र्या श्च न्द्र स्य चं द्र क ला वा रि त स्कां
दे द र्शि तं अ मा षो ड शा ना गा न दे वि प्रो क्ता म हा क ल ति ता क ला मु
प ज्जी व्य नि र्व च नं भ ग व ती पु रा णे र्शि तं क ला व शि ष्टा नि : क्रां तः ८२
प्र वि ष्टः सू र्य म ण्ड लं अ मा यां वि श ति य स्मा द मा वा स्या त त : स्मृ
ते ति अ मा वा स्या रात्र्या श्च प र्या यो दर्श रात्र्यो पि द्व या नि रू प्य ते सू
र्या चं द्र म सौ प र स्प र प श्य तो त्रे ति द र्शः त दु क्तं म त्स्य वा यु पु
रा णयोः आ श्रि त्य ता म मा वा स्या प र स्प र त : सु स मा ग तौ अ न्यो
न्यं चं द्र सू र्यौ तो प्र दा ता द र्शो उ च्य त इ ति न द श्य ते चं द्रो त्रे ति द्वि ती य
नि र्व च नं य द्य पि त दा नी म द र्शो इ ति व क्ष्य ते त था पि वि प रीत ल क्ष
यो द र्शो इ त्यु च्य ते त दे त द्व्या चा र्यै रु क्तं भ रे का त र रात्र्या व दि त्वं

दादर्शनवशात्पथवाक्येनपूर्वमुदाहृतंसयत्रैषएतांरात्रिन
पुरस्तान्नपश्चाद्दृश्यतइति।अदर्शनेकारणंसूर्याचंद्रमस
रत्यंतसंनिकर्षःसतिचतस्मिन्संनिकर्षमहतासौरेणतेजस
चांद्रंतेजोभिभूयते।अतएवपौर्णमास्यांसत्यंतविप्रकर्षसति अ
नभिभूतत्वाच्चंद्रमंडलंसंपूर्णंविशदंदृश्यते।तावतोसन्निकर्षविप्र
कर्षौगोभिलआह।यःपरोविप्रकर्षःसूर्याचंद्रमसोःसापौर्ण
मासीयःपरःसन्निकर्षःसामावास्यतितदेवं।पर्वाभिधायाः
पंचदश्याःपूर्णिमादिनामनिर्वचनेनस्वभावविशेषाज्ञापि
तोभवतिचपौर्णमास्यमावास्यप्रत्येकंद्विविधेतद्यपुराणदर्श
नं।राकाचानुमतिश्चैवंपूर्णमासिद्विधास्मृता।सिनीवा

लीकुहूश्चैवममावास्याद्विधैवनुइति।एताःपंचचतृसृणां
स्वरूपंकाठकशाखायांविस्पष्टंश्रूयते।यापूर्वापौर्णमा
सीसानुमतिर्यत्तरासाराका।यापूर्वामावास्यासासिनीवा
लीयोत्तरासाकुहूरितिकृत्वासिष्ठोपिराकाचानुमतिश्चैव
पौर्णमासीद्वयंविदुः।राकासंपूर्णचंद्रास्यात्कलानानुमति
स्मृता।पौर्णमासीदिवादृष्टेशशिन्यनुमतिःस्मृता।रात्रिदृ
ष्टेपुरस्तस्मिन्सिनीवालीतिकीर्तितेति।मत्स्यब्रह्मांडपुराण
योः।यस्मात्तामनुमन्यतेपितरोदेवतैसह।तस्मादनुमति
र्नामपूर्णिमाप्रथमास्मृता।अत्यर्थंराजतेयस्मात्पौर्णमा

स्यां निशाकरः रंजनोश्चैव चंद्रस्य राकेति कवयो विदुरिति। कुहूव
रिष्ठः। दृष्टश्चंद्रामावास्यासिनीवालीप्रवक्षते। एतामेव कु
हूमाहुर्नष्टचंद्रांमहर्षयइतितदेवंचतुर्दशः पर्वनेदानिरूपि
तः। तत्रकुहूव्यतिरिक्तानांत्रयाणांनेदानींलघ्वक्षराश्चारण
परिमितःकालःसंधिरित्युच्यते। कुहूस्त्वक्षरद्वयपरिमितःका
लस्तदेतदुक्तंनगवतीपुराणे। अनुमत्याश्चराकायाःसिनीवाल्याः
कुहूविना। एतासांदिलवःकालःकुहूमात्राकुहूःस्मृतेति। तत्रल ॥२१६॥
वःस्वरूपंस्मृत्यंतरदर्शितंलघ्वक्षरंचतुर्मात्रंस्मृटिरित्यभि २१३
धीयते। तत्रटिद्वयंलवःप्रोक्तोनिमेषस्तुलवद्वयमितिएवंच
सतित्रटिशब्दोभिन्नेयानांनागानांचतुष्टयंलवद्वयरूपंलघ्व

क्षरसमंभवति। तस्मिंल्लघ्वक्षरपरिमितेकालेएकः पर्व
णोनागः द्वितीयःप्रतिपदस्तदुभयंमिलित्वासंधिर्भवतीत्वा
कुहूःप्रतिपदोःसंधिस्तूपूर्वस्माद्द्विगुणःअक्षरद्वयपरिमित
त्वात्। तामत्स्यब्रह्मांडपुराणयोःराकानुमतिश्चैवसिनीवाली
कुहूःसाम्तथा। एतासांदिलवःकालःकुहूमात्राकुहूस्तथा। कु
हूतिकोकिलेनोक्तयावत्कालःसमाप्यतेःतत्कालसंज्ञितावै
वंअमावास्याकुहूःस्मृता। इत्येषपर्वसंधिनांकालोवा
द्विविधःस्मृतइति। एवंसंधौनिरूपितेसतियांप्रक्रांतो
विचारस्तत्रसंधिरावृष्टिकालइतितावत्प्राप्तंसंधोयजे

तेत्यृतेः। मैवं॥ संधेः सूक्ष्मत्वात् तत्र यागानुष्ठाना नुपपत्तेः।
कात र्हि ऋतेर्गतिः। पार्श्वद्वयलक्षितिब्रूमः। यथा गंगायां घोष
इत्यत्र गंगाशब्दः प्रवाहेनुपपन्नस्तत्समीपंतीरंलक्षयति त
थासंधिशब्दोपि पार्श्वद्वयंलक्षयति अत एवस्कृत्यंतरं संधिम
नितोयजेतेति बोधायनोपि सूक्ष्मत्वात् संधिकालस्य संधि
विषयउच्यते। सामीप्यं विषयंप्राहुः पूर्वेणापि परेण चेति।
अत्रपूर्वापरशब्दाभ्यां संधेः प्राचीनं पूर्वदिनं प्रतीचीनं प्रति
पदिनं चाभिधीयते। तत्र पूर्वस्मिन्पर्वदिनेयागप्रारंभः। उत्तरस्मि
न्प्रतिपद्दिनेयागसमाप्तिः। अन्वाधानमिध्मावहिःसंपादनम

ग्निपरियहेउपस्तरणंचेत्येवमादिःप्रयागः प्रारंभः सच
पूर्वेद्युरनुष्ठेयः। तथाचैतत्तैत्तिरीयब्राह्मणेश्रूयते। पूर्वेद्युरि
ध्मबर्हिःकरोतीत्यग्नमेवारण्यगृह्येवोपवसतीति। शत
पथब्राह्मणेपि। पूर्वेद्युरग्निंगृह्णातीत्युत्तरमहर्यजतीति। त
त्राग्नियहणंनामाध्वर्युणाआहवनीयगार्हपत्यदक्षिणाग्नि
षुसमाग्नवर्चइत्यादिनिर्ऋग्निःसमिदाधानलक्षणंअन्वा
धानेक्रियमाणेपार्श्ववर्तिनायजमानेनाग्निंगृह्णामीत्यादि
नामत्राणापठनंतदिदंपर्वदिनेक्रियते। प्रतिपद्दिनेतुकर्मणेवं।
देवेभ्यइत्यादिनिरध्वर्युहस्तप्रक्षालनतंदुलनिर्वापपुरोडाश
प्रदानादिलक्षणंप्रयोगंकरोतितदिदंयजनं। एतदेवाग्निप्रे

संधीयाग
प्रकरण

अन्वाध
नप्र

५ पदनुास्त्रयश्च विहितः कालः यतुप्रतिपदश्चतुर्थीग्राःतदेतदहलोगाक्षिः। त्रीतरानो
पवस्तस्यौ
त्येगोनिलआहापक्षांताउपस्तव्याःपक्षादयोपियष्टव्याइति ७०५
अत्रोपवासराद्दनांग्युपस्तरणादिविवक्षितःतस्मिन्क्रिय
माणेयजमानसमीपेदेवतानांनिवासात्तदेवंतन्नरीयब्रा
ह्मणेदर्शितंउपास्मिन्नुधोयक्ष्यमाणेदेवतावसंतियएवं
विद्वानग्निमुपस्तरणतीतिउपवासराद्दाऽधेयस्यैयाग
स्यचतुरोविदुःदावग्नावुत्सृजेदंत्योयागेचव्रतकर्मणी
ति।तमेवयज्ञकालयज्ञाद्याश्चोप्यादः॥पंचदश्याःपरः ॥२५॥
पादःपक्षादःप्रथमास्त्रयःकालःपार्वणयागस्यादर्थांते
नविद्यतइति।वद्यशातातपोपिपर्वणोयश्चतुर्थीग्राःआ
द्याःप्रतिपदस्त्रयःयागकालःसविज्ञेयःप्रातरुक्तोमनीषिभिः॥
स्यैपूर्वदिनेकर्त्तव्यस्यान्वाधानादेःपर्वणिचतुरग्रावतिअद्यास्त्रयोग्राःविहितःकालः
चतुर्थीग्राःयागराद्धाऽधेयस्यपुरोडाशप्रदानादेःपूर्वेद्युःपर्वचतुर्थीग्राप्रति२
उ

अत्रप्रातरितिविशेषणात्सूर्योदयस्योपरिमुहूर्त्तत्रयंयाग
कालइत्युक्तंभवति।प्रतिपदश्चतुर्थीग्रांनिषेधतिकात्यायनः।
नयष्टव्यंचतुर्थीग्रायागेप्रतिपदःक्वचिदपरक्षांसितदिनुपंतिश्र
तिरेषासनातनीति।तदेवंपर्वण्यन्वाधानादिकंप्रतिपादीष्टि
रितिसंधिपार्श्वयोरुभयोःप्राग्रुसमाप्तीव्यवस्थितेषुदाप
र्वप्रतिपदावुदयंप्राप्यसंपूर्णतिथिर्भवतःतदानको
पिसंदेहः॥यदाखंडतिथीतदानिर्णयोनिर्णीयतेतत्रगो
निलःआवर्तनेयदासंधिःपर्वप्रतिपदोर्भवेत्तदूर्ध्वगड्ष्यतपरतश्चेत्परेह्नि।पर्वप्रतिपदोःसंधिरवागाव
र्तनात्यदितस्मिन्नहनियद्दष्टव्यंपूर्वेद्युस्तदुपक्रमः॥आ
वर्तनात्परंसंधिर्यदितस्मिन्नुपक्रमःपरेद्युरिष्टिरित्येषप

र्वेद्यपि निश्चय इति लोगाक्षिरपि पूर्वेल्लेवाथ मध्याह्नेयदि
पर्व समाप्यते उपोष्य तस्मिन्नह निश्चोनूते योग इष्यत इति ए
तेषु वचनेषु मध्याह्नादि शब्दा योगिकाः नन्वेवं पंचधा विभाग
माश्रित्य प्रवृत्ताः तथा सति अह्नो मध्यो मध्याह्न इति व्युत्पत्तेरा
वर्त्तनं मध्याह्न शब्देनाभिधीयते अतएव गोभिलेनापि नाव
र्तन शब्दः प्रयुक्तः शातातपेनापि मध्याह्न शब्दः प्रयुक्तः पू
र्वेल्ले मध्यमे वापि यदि पर्व समाप्यते तदोपवासः पूर्वेद्यु
स्तद्दर्शयोग इष्यते इति अह्नः पूर्वो भागः पूर्वेल्लः अह्नः
परो भागोऽपराह्णः अतस्तान्यां शब्दाभ्यां आवर्त्तनात् पूर्वोत्त
रभागावभिधीयते वाजसनेयिनोविशेष माहुस्तार्थ्यसंग्रा

ह्नकौ रेकारौ मध्यदिनात्परादह्नीहयस्मिन्नाकावर्णः
संधिरियंतृतीया सावर्विकाजोवोसनेयिमत्यातस्या
मुपोष्याय परेद्युरिष्टिरिति आवर्त्तनादूर्ध्वमस्तम
यादर्वाक्यदासंधिर्भवतितदासंधिमतीतिथिः प्रथमारा
त्रौ संधिश्चेत्सातिथिर्द्वियातेउभेअपेक्ष्यपूर्वेल्लेसंधि ती
मतीपर्वतिथिस्तृतीयानवतिःतस्यांतृतीयायांतिथौ
पूर्वकालस्यात्पत्वात्सावर्विकेत्युच्यते शाखांतरा
ध्यायिनामीदृशे विषये पूर्वेद्युरन्वाधानं उत्तरतिथा

विष्टिःएवंचसतिवाजसनेयिनांनक्षापिसंधिदिना
त्पूर्वेद्युरन्वाधानादिकमस्तिसोयंविशेषः।आवर्त्तने
नतथापुरावायदासंधिर्नवतितदावाजसनेयिव्यति
रिक्तानापर्वचतुर्थीनेष्टिःप्राप्नोति।तत्रविशेषमा
हगार्ग्यः।प्रतिपद्यप्रविष्टायांयदिवेष्टिःसमाप्यतेपु
नःप्रणीयकक्षेष्टिःकर्त्तव्यायागवित्तमेरित्ति॥पर्वण
श्चतुर्थीशाःप्रतिपदस्त्रयोंशायागकालत्वनाभिहिताः॥
तत्रपर्वचतुर्थीशास्यविषयउदाहृतःप्रतिपद्यदंशानांवि
षयउदाह्रियते।ऊषःकालेसंधौप्रतिपदःप्रथमांशोया

गकालः।निशीथेसंधौद्वितीयांशःरात्रिप्रारंभेसंधौ
तृतीयांशः।नन्वेनन्न्यायेनापरह्लेसंधौप्रतिपच्चतु
र्थीशास्ययागकालत्वंप्राप्नोति।तच्चप्रतिनिद्धंनयष्ट्व्यं
चतुर्थीशइतिस्मृतेः।अतस्तादृशविषयेयागएवलुप्यते
तिचेत्।मैवंवादृशातातेनप्रतिप्रसवाभिधानात्॥सं
धिर्यदापरह्लस्याद्यदिप्रातःपरेह्नि।कुर्वाणःप्रतिपद्या
गेचतुर्थेपिनदुष्यतीति।एवंतर्हिप्रतिषेधोनिर्विषयःस्या
दितिचेत्।मैवं।सद्यःकालविषयेचरितार्थत्वात्।तंचविषयंद
र्शयति।कात्यायनः।संधिश्चेत्संगवादूर्ध्वंप्राक्चेदावर्तनादवेः।सो

पौर्णमासीविज्ञेयाऽसद्यकालविधौतिथिरिति।भाष्यार्थसंग्रहका
रोपि।अन्वाहितिथ्यास्तूपवासात्पूर्वेद्युरेतेखलुपौर्णमास्या
आवर्तनात्प्राग्यदिपर्वसंधिःसद्यस्तदैवक्रियतेसमस्तमिति।
आपस्तंबोपि।पौर्णमास्यन्वाधानपरिस्तरणोपवासःसंधि
वासद्यस्कालायांसर्वेक्रियतइतिसंगमावर्तनयोर्मध्येपौर्ण
मासीप्रतिपदोःसंधौसतिपूर्वेद्युरहतेर्दर्वनेःसंधिदिनात्पूर्वे
द्युरन्वाधानादियत्प्राप्नुतत्रसद्यस्कालवाक्यःसंधिदिनउत्कृष्य
तेनान्वीदृशेविषयसंधिदिनात्परंदिनेयागउत्कृष्यतांत
थासत्यपरेद्युरसंधिश्चिद्वान्वाधानयागयोर्दिनभेदेन
विरुध्यते।अस्तिचात्रदृष्टांतोवाजसनेयिनामीदृशेविषयेअ

न्वाधानोत्कर्षेसतियागस्यापुत्कृष्टत्वात्तामेवं।अन्व
यव्यतिरेकरूपाभ्यांविधिनिषेधास्यांमस्याःशंका
यानिवारितत्वात्तत्रसद्यस्कालविधयोन्वयरूपाःप्रतिप
च्चतुर्थीश्रीप्रतिषेधःव्यतिरेकरूपः।एवंचसतिप्रतिषेधवा
क्यंसावकाशंभवति।अमावास्यायाविशेषमाहाग्नेय
शातातपः।द्वितीयात्रिमुहूर्त्तीचेत्प्रतिपद्यापराह्णिकी॥
अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनात्।सोयंविशे
षोनाश्वलायनापस्तंबविषयःकिंतुबौधायनमतानुष्ठाना
विषयःअतएवबौधायनः।द्वितीयात्रिमुहूर्त्तेचेत्प्रतिपद्या
पराह्णिकी।अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनात्।च

तुर्दश्यां चतुर्थ्यामाअमावास्यानदृश्येतेश्वोभूतेप्रतिपद्ये
त्यर्थः तत्रैवकारयेत्। चतुर्दश्यांचसंपूर्णायांद्वितीयासयुक्ता
यामी॥ चतुरिष्टिरमायांस्याद्धूतेकव्यादिकीक्रियेतिगृह्य
परिशिष्टवचनानामयमर्थः। अह्निचतुर्दश्यांसंपूर्णअस्तमयादर्वा
ग्मास्यास्वल्पातत एवापराह्णव्याप्तिभावात्। श्राद्धायान्वाधा
नायवापूर्वोक्तरीत्यायद्यपिनिमित्तेनोद्धंनयेत्तथापिप्रति
पदिद्वितीयायांसत्यांचंद्रस्यदृश्यमानत्वात्तदर्शनेचेष्टसि
द्धेस्तिथिक्षयेतायाममावास्यायामिष्टिः। स्वल्पामावा
स्यापितायांचतुर्दश्यांश्राद्धान्वाधानादिकंकर्त्तव्यमितिएत

देवानिष्टेत्यस्मत्यंतरेआदित्येस्तमितेचंद्रःप्रतीच्यामुदिया
द्यदा। प्रतिपद्यतिपत्तिःस्यात्पंचदश्यांयजेतदेति। दृहद्वसि
ष्ठोपिद्व्येनिरस्तेयेपोसिपुरस्तादुदितेविधौ। यद्वैगुप्यंदुते
तस्मिन्यश्चादपिहितद्वेदिति। अस्यायमर्थः संपूर्णचतुर्द
श्यामविचारेणामावास्यांबुद्धिंकृत्वाअन्वाधानादिकंकृत्वा
हविर्निर्वापनंकरोति। कृतेतस्मिन्पुनः काळेपूर्वस्यांदिशिचंद्र
माःउदेतितदानदर्शकर्मनिवर्तयितुमर्हति। दर्शकालस्यप्रा
धान्यात्किंतुकालापराधंनिमित्तीकृत्यदर्शदेवताअपनीय
दात्रादिगुणविशिष्टाग्न्यादीनिदेवतांतराणुद्दिश्यहविःशे

BHAU DAJI

क्षपोविहितःतदेतत्तैत्तिरीयब्राह्मणेस्मृयतेायस्यहविर्निरु
प्तंपुरस्ताच्चंद्रमाअभ्युदेतित्रेधातंदुलान्विनजेद्यमध्य
मास्यस्तातनयदात्रेपुरोडाशमष्टाकपालंकुर्यात्तंनि
र्वायपदात्रेदर्भस्तंबेयक्षादिष्टाला × परस्तविणास्ता×
न्विक्षुवेनिरपिविष्टायवृतेचरमितिसोयंदृष्टांतइति
षिनिरूपितेसतितऊर्द्ध्वंस्यादिन्दावुदितेसतिदर्शे
कर्मविधेर्दैवुप्यसुक्तरीत्याव्यवस्थितोतदुदेवेगुण्यं ॥२२०॥
होमयस्मिन्नहनिपुरस्तात्यश्चासोमोनदृश्यतेतदहर्यजे
तेतिअयमर्थःस्त्रीनीवाल्यापुरस्ताच्चंद्रोदर्शेनवतिदि
तियायुक्तायांप्रतिपदिपश्चाच्चंद्रोदृश्यतेतयोरुभयोर्मध्ये

वर्त्तिन्यांकुहूंद्विविधमपिचंद्रदर्शेनास्तिअतप्रायश्चि
त्तमाहकात्यायन॥यजनीयेद्विसोमश्चेद्दारुण्यांदिनिरि
क्ष्यतेतत्रव्याहृतिभिर्हुत्वादेवंददत्वाद्विजात्योइतिचंद्र
दर्शनरहित्यमेवाभिप्रेत्यबोधायनकारिकापश्यतोइ
ष्टेनलंप्रतिपदोनाद्यःसप्तास्वायत्रनवंतितत्स्यात्
क्षीणासुनदीसुदिनस्यपूर्वेःकल्पोथदद्यावनवद्वितीं
यइतिअयमर्थःअमावास्यासंवधिनीषुडीनीषुक्षी
णासुसतीषुतस्मिंदिनेस्तमयात्पूर्वंप्रतिपत्संबं
धिन्योनाड्यःसप्तास्वायदिनवंतितदातदिनमिष्टिलं
योग्यंसोयमेकःपक्षःअमावास्याप्रतिपदोयदाद्वैतेत

दाद्वितीयंकल्पान्नवेत्। अमावास्यायामन्वाधायसोम
दर्शीनरहितेप्रतिपद्दिनेयागःकर्त्तव्यः। स्मर्य्यतेऽपि।
अर्वाग्स्तमयाच्चन्द्रदर्शोयातुप्रदृश्यतेऽतत्रयागंनकु
र्वीतविश्वेदेवाःपराशुरुवाइति। बोधायनमतानुसारि
णामन्वाधानवद्दर्शश्राद्धमपि स्वल्पामावास्यांवा
यांचतुर्दश्याकर्त्तव्यंतथाचबोधायनेनोक्तं। यदाचतुर्दशीया
मंतुरीयमनुपूरयेत्। अप्रमावास्याक्षीयमाणातदेवश्राद्ध ॥२२॥
मावरेत्। चतुर्दश्यांचतुर्थामेअमायत्रनदृश्यते। श्वोभूतेप्र
तिपद्यत्रक्रतेकर्म्मादिकीक्रियतिचतुर्थामेअमावास्यासंपूर्णा
नदृश्यते। किंत्ववसानेस्वल्पासाचपरदिनेक्षीयतेतदानीच



तुर्दश्यांश्राद्धमावरेत्। ननुचंद्रदर्शेदिनोपेतायांप्रतिपदिइ
ष्टिःसमाम्नाताऽतथानुज्ञाताऽतपरंब्राह्मणंयदहःपश्चाच्चंद्र
माअस्यकेपतित्वाऽतदहर्यजन्निमान्लोकान्नव्युपेतिनैतिरीय ॥२३॥
ब्राह्मणमपिइमावेसुमनानामेष्टिर्यमघेजानंपश्चाच्चंद्रमा
अस्यकेत्यस्मिन्नेवास्मिलोकेकंकुरुवतीति। अयमर्थः॥
येयमिष्टिश्चंद्रदर्शनोपेतेप्रतिपद्दिनेक्रियतेसेयमिष्टिःसु
मनस्त्वाद्वाच्यातादर्शीमिष्टिंकृतवंतंयजमानमभिल
क्ष्यतस्मिन्दिनेपश्चाच्चंद्रमाउदेतितस्मैयजमानायास्मिन्लो
केसमृद्धिंनेवतीति। वाढं। तदेतत्सुनिदृयंबौधायनमेतानुसा
रिणांतिरिक्तेविषयं। एनदेवाभिप्रेत्यप्रतिपच्चतुर्थीत्रोयागउदाह

तः। ननु बौधायनव्यतिरिक्तानामपि चंद्रदर्शन योग्यं द्वितीयायु
तं प्रतिपद्दिनमिष्टौ निषिद्धं तथा च स्मृतिः पर्वणोस्तोयेतु
कार्यनिष्टिर्द्विजोत्तमैः। द्वितीयासहितं तस्मादृषयस्त्वाश्वलाय
नाः। तदेतदावर्तनात्पूर्वकालयोः संधौ सतिद्रष्टव्यं। अपरा
ह्णादिसंधिषु एवं चतुर्थ्यष्टअप्राप्तत्वात्। तदेवं प्रकृतिरू
पायाइष्टेः कालो निरूपितः। विकृतेस्तु कालो निरूप्यते। तत्र
कात्यायनः। आवर्तनात्प्राग्यदि पर्वसंधिः कृत्वातु तस्मित्र ॥२२२॥
कृतिविकृत्यातत्रैवयागःपरतोयदि स्यात्तत स्मिन्न विकृत्या
प्रकृतेःपरेद्युरितिआवर्तनेततःपुरावापर्वसंधौतस्मिन्दिने।
प्रथमंविकृतियागकृत्वापश्चाद्विकृतिसंबंधीयागःकर्तव्यःप

र्वावर्त्तनात्परतः संधिस्तदाकेवलविकृतियागः संधिदिने
कर्त्तव्यः प्रकृतियागस्तुसंधिदिनात्परेद्युरनुष्ठेयइत्यर्थः। आ
वर्तनेततःपूर्वकालेपरकालेवा संधिरित्येतेषुत्रिष्वपिपक्षेषु
संधिदिनएवविकृतेरनुष्ठानं प्रकृतेस्तुपूर्वोक्तरीत्यासंधिदि
नेपरेद्युर्वानुष्ठानंव्यवतिष्ठतेइष्टिनांसर्वासांप्रकृतिर्दर्श
पूर्णमासौपैंडाग्रमेकादशकपालंनिर्वपत्प्रजाकामइत्यादयः। क
ण्डांतरपठिताःकाम्येष्टयोःविकृतयःतत्र प्रकृतिवद्विकृतिः
कर्त्तव्येसतिसंधिदिनात्परेद्युःकदाचिदनुष्ठानप्राप्तं। तदेतदु
दाहृतेनवचनेननिवार्यते। इष्टिकृतिन्यायःपशुविकृतिषु
विकृतेरपिद्रष्टव्यः। पशूनांसर्वेषामग्नीषोमीयःपशुःप्रकृ

तिः वाय्यं श्वेतमालभेतेत्यृतिकामइत्याद्याः कोटांतरपठिताः॥
काम्यपशवो विकृतयः सोमयागानां सर्वेषामग्निष्टोमप्रकृतिः।
उक्थ्याषोडश्यतिरात्रादयो विकृतयः। त्रिविधानामिष्टिपशुसो
मविकृतीनां पर्वैककालः। तदेतदापस्तंबआह। यदीष्टयाय दिव
सेनायदि सोमेनयजेतामावास्यांपौर्णमास्यांयजेतेति। अत्रापि
पूर्ववत्प्रतिपदिकदाचित् इष्टिप्राप्तौतद्यावर्तयेपुनः कालोविधीय
तेतस्माद्विकृतीनांपर्वैककालइतिस्थितं। ननुप्रकृतेयथोक्तका
लात्कालांतरंकथंचित्स्मार्यतेषोडश्यादिग्रहन्यूनेष्टिर्मध्यापंचदश्या
हनीति। चतुर्दश्यांजघन्येष्टिःपापासप्तदश्याहनीति। चतुर्दश्यां
जघन्येष्टिः पापासप्तदश्याहनीति। अयमर्थः। पूर्वप्रतिपदिनमा

रभ्यगणनामागामिप्रतिपद्दिनंषोडश्यवति। तत्रेष्टिरभी
ष्टिरुत्तमात्तःपूर्वस्मिन्पंचदश्यांदिनेमध्यमातःपूर्वदिनेज
घन्यात्देवंकालत्रयंविहितंउत्तमकालात्षोडश्यादिना
दृर्ध्ववृत्तिनिसप्तदश्यादिनेप्रतिषिद्धावाढं। तत्रोत्तममध्यमपक्षौ
स्त्रीयोतिथीनांद्वयक्षयाभावेसतिउत्तमपक्षःप्राप्नोति।
एकस्मिन्दिनेक्षीयोसतिमध्यमपक्षःप्राप्नोतिजघन्यपक्ष
स्तुनस्यास्त्रीयःदिनद्वयक्षयाभावात्। अतोजघन्यग्राह्योनि
षेधविवक्षयाप्रयुक्तः। नन्वरेकार्यपक्षांतरविवक्षया। ननुति
थीवृद्धाविष्टिःसप्तदश्यांतिथिः। तत्कथंपापःसप्तदश्याहनी
तीप्रतिषेधः। नायंदोषः। अल्पतिथिवृद्धौयदाषोडश्यादिनेऽमा

वास्यादर्शचटिकासप्तदशदिनेप्रतिपद्दर्शतोतदानीप्रतिपच्च
तुर्थीशास्येष्टिकालत्वाच्चानुष्ठानप्रसक्तौअनेननिवर्त्य
तेतृतीयन्यायेपूर्वाह्लसंश्लेषेतदिन एवेष्टेःकर्तव्यत्वेननि
र्णीतत्वात्पयदातुमहत्यादृश्यापोडशादिनऽमावास्यासंपू
र्णासमदर्शेनप्रतिपत्संपूर्णोतदानप्रतिषिध्यतेतनुबोधाय
नेदंत्रयोदशासप्तदशदिनयोरन्वाधानंप्रतिषिध्यतेयत्रो
पवसथंकर्मयजनीयत्रयोदशंचेत्सप्तदशंवापितत्प्रय
त्नेनवर्जयेदितिअत्रजनेयीयंप्रतिपद्दिनमास्त्यपंचदश
दिनमौपवसथस्यमुख्यःकालःतिथिक्षयेचतुर्दशादिनं
तिथिवृद्धौषोडश्यदिनंतथासतित्रयोदशासप्तदशयोःप्रस

कालांतर इष्टिप्र॰

क्तिरेवनास्तितत्कथंप्रतिषिध्यइतिचेत्एवंतर्हिअप्रसक्तप्र
तिषेधोनित्यानुवादोऽस्तिचाप्रसक्तिप्रतिषेधरूपोनि
त्यानुवादोनपृथिव्यांनांतरिक्षेनदिव्यग्निश्चेतव्यइतिश्रुतेः।
पर्वत्रयपर्वप्रतिदोषेसंधिमुपजीव्यान्वाधानेष्टिकालोव्यवस्था
पितोऽत्रतिथिक्षयवृद्धोःसंधिविषयकिंविद्दिशेषमाहाका
त्यायनःपरेद्युश्चटिकान्युनास्तथैवाल्याधिकाश्चयाःतद
कृत्स्नेपूर्वस्मिन्पूर्वस्मिन्प्रकल्पयेदितिकात्यायनोगार्ग्यक्षिरपिःतिथेःप
रस्याश्चटिकास्तुयाऽप्युनास्तथावान्यधिकास्तुतासांअ
र्द्धंवियोज्यंचतथाप्रयोज्यंद्वीसवृद्धौप्रथमेदिनेतदितिः।
पूर्वेह्नेरमावास्यापंचदशचटिकापरेह्नःप्रतिपदेतावतीतदा

यथा स्थित त्वमेवोपजीव्य संधिर्विज्ञेयः। यदानुप्रतिपदः षड्
घटिकाः क्षीयंते तदा घटिकात्र यद्वा सोमावास्यायां योजनीय
तस्मिन्योजिते द्वादश घटिका मावास्या भवति। तदा अवर्त्त
नात्पूर्वसंधिः संपद्यते अनेनैवन्यायेन घटिकात्र यद्वा
योजितायामष्टादश घटिका मावास्या न भवति। तथा सत्या
वर्त्तनादूर्ध्वसंधिर्न भवति। तदेवं संधिं विज्ञाय तदनुसारेणान्या
नेष्वप्यनुष्ठातव्येष्विष्टिकालनिर्णयः॥ ॥नन्विष्टिकाल
वद्ग्रहणकालोप्यत्र ह्वेणेतव्यः पूर्वप्रतिपत्संध्युपजीवने
नप्रवृत्तत्वात्॥ तथा यद्वद्गार्ग्यः। पूर्णिमाप्रतिपत्संधौरा
हुः संपूर्णमंडलोग्रसते चंद्रमर्कोदर्शप्रतिपदंतर इति॥

ब्रह्मसिद्धांते। यावत्कालः पर्वणोंते तावत्प्रतिपदादिमत्। रवी
दुग्रहणेऽनेदासपुण्येमिश्रणात्स्ववत इति। अनेकहाका
लः। वाढं। यद्यपि संध्युपजीवनंतथापि निर्णेतव्योरास्य
तिथिविषयस्याभावात्। अस्मिन्प्रकरणेयुगे। कर्त्तव्यवि
शेषस्तूपरितेनप्रकरणेनिरूपयिष्यते॥ ॥इतिश्रीमाधवीये
कालनिर्णयेद्वितीयादितिथिनिर्णयाख्यंचतुर्थंप्रकरणं॥
तृतीयचतुर्थाभ्यांप्रकरणाभ्यांप्रतिपदाद्याःपंचदशतिथयः
सर्वास्तिथयोनिर्णीताः। अथप्रकीर्णकरूपेपंचमप्रकरणेन
क्षत्रयोगादयः कालविशेषुकर्त्तव्यविशेषाश्चसंक्षेपेण
निरूप्यंते। अत्रापितिथिवत्संपूर्णनक्षत्रसंदेहाभावा

त्रखंडनक्षत्रे निर्णयोग्येक्ष्यते सच निर्णयोदर्शितो विष्णुधर्मोत्तरे उपोषितव्यंनक्षत्रंयस्मिन्नस्तमियाद्रविः युज्यतेत्रवारामनिशीथेशशिनासहेति अत्रास्तमययोगोनिशीथयोगश्चेतियोगद्वयंप्रयोक्तं अस्तमयायागोमुख्यःकल्पः निशीथयोगोऽनुकल्पः योगद्वयलब्धेसत्यनुष्ठानंप्रशस्तंः यदापूर्वविद्धःकेवलोनिशीथयोगः परविद्धःकेवलोस्तमययोगःतदामुख्यकल्पानुसारेणपरविद्धरेवोपवासःतथाप्रातःसंकल्पकालेनक्षत्रसङ्गोवापि लभ्यतेनिशीथेशशिनायुतदुक्तिर्ज्योतिःशास्त्रसिद्धस्य शशियोगस्यविहितत्वात्नक्षत्रसङ्गमात्रमभिधीयत इत्यवगंतव्यं दिनद्वयेऽप्यस्तमययोगानावनिशीथयोगेन

पूर्वविद्धरेवोपवासःतदाहसुमंतुः यत्रार्द्धरात्रादर्वाक्तु नक्षत्रं प्राप्यतेतिथौतत्नक्षत्रव्रतंकुर्यादतीतेपारणंनवेदितिनात्रतिथिश्चिवैकनक्तंनक्षत्रयोर्मध्यानप्रदोषव्याप्तिन्यूनानिर्णयः किंतूपवासनक्षत्रेएवतदुभयेकर्त्तव्यं तदुक्तंस्कंदपुराणे तत्रवोपवसेत्नक्षेयन्निशीथादयोनवेत्नउपवासेयदक्षंस्यात्तद्दिनक्तेकनक्तयोरिति यत्तुविष्णुधर्मोत्तरे सातिथिस्तद्वनक्षत्रंयस्यामभ्युदितोरविः तयाकर्माणिकुर्वीतद्वासवृद्धीनकारणमितितदुपवासव्यतिरिक्तव्रतादिविषयंयदपिबोधायनवचनंसातिथिस्तद्वनक्षत्रंयस्यामभ्येतोरविःवर्द्धमानस्यसूक्तस्य

हा ने स्त्व स्तमयं प्रति। तु पित्र्यकार्ये विपर्ययं दापि मार्कंडे
येनोक्तं। तन्नक्षत्रमहोरात्रं यस्मिन्नस्तं गतो रविः। यस्मिन्नु
देति सविता तन्नक्षत्रं दिनं भवेदिति। अस्यायमर्थः। वि
हितो विधो नक्षत्रसंबंधी कालविशेषः। अहोरात्रं दिनवत्
त्रोदितकर्मापि हि विधं। अहोरात्रविशिष्टनिष्पाद्यं
भोजनमेकभक्तादेः स्वरूपं तथाविधमस्मिन्नहोरात्रे भोज
नांतरस्यैकभक्तादिनियमधातिथ्यभोजनांतरपरित्याग
सहितस्यैव सहभोजनस्यैकभक्तादिस्वरूपत्वाद्दोरा
त्रसाध्यत्वमविरुद्धं दिनमात्रसाध्यातिथ्यादिव्रतश्राद्धा
नितेषामहन्यृतत्रोपवासादीनां क्षत्राहोरात्रो गृहीतव्यः।
व्रतादीतु नाक्षत्रं दिनं गृहीतव्यं। अहोरात्रस्य नाक्षत्रत्वं सू
वविधानात्

र्यास्तमयकाले नक्षत्रव्याप्तासंपद्यते। दिनस्यतु नाक्ष
त्रत्वं सूर्योदयव्याप्त्यापेक्षयेति। यद्यपि यस्मिन्नुदेति स
वितेत्यनेन नक्षत्रसद्भावमात्रं प्रतीयते। नतु परिमाण
विशेषः तथापि त्रिमुहूर्तपरिमाणस्यातिथ्यादेः कृत्स्नत्वान्न देवा
त्रानुसंधेयं। ननु दानव्रतवत्श्राद्धेपि नक्षत्रं दिनस्वीका
रे प्रातःकालेमात्रव्यापिनक्षत्रेपि श्राद्धं प्रसज्येत। मैवं।
अपराह्णस्यपार्वणश्राद्धकालत्वेनतद्व्याप्तेरपेक्षितत्वा
द्यथाचस्मृतिः। नक्षत्रेखंडितेयेनव्याप्तः कालस्यैस्तुक
र्मणः। नक्षत्रेकार्यिण्यत्रैव तिथिकर्मतथाप्यते। नत्वनेन
न्यायेनैकभक्तेमध्याह्नव्यापिनक्षत्रं ग्राह्यमिति शंकनीयं।

उपवासनक्षत्रएकैकउक्तेप्रतिपदोक्तत्वात्तदपिस्मृति
वचनंतिथीनामितिमाभागस्तिथिकर्मसुपूजितःऋक्षाणांपू
र्वभागस्तुऋक्षकर्मसुपूजितः।तत्रतिथ्यंतपूज्यत्वंदान
व्रतादिविषयंनक्षत्रपूर्वभागादिपूज्यत्वंमुपवासादिवि
षयंउपवासादिव्यतिरिक्तेतुदेवेकर्मणिनक्षत्रस्याप्यं
त्यभागपूज्यत्वंद्रष्टव्यं।नक्षत्रविशेषतुपूर्वरूपस्यलिंग
स्यश्रवणानुयकर्मउत्तराषाढसंयुतंसंवत्सरततोध्या
यूक्तक्षणादेवनश्यति।धनिष्ठासंयुतेकुर्यात्श्रावणंक
र्मयत्पुनावेत्तत्कर्मसफलंविधादुपाकरणासंभवमिति
नविरुद्धात्तयोगेषुतुकस्यचिल्लिंगस्यपूर्वद्युर्निशीथमा

त्रव्याप्तिंप्राप्तस्त्वकलात्सायंकालादिव्याप्तिर्ग्राह्यादियो
गःस्यैद्युर्निशीथमात्रंव्याप्नुयात्तदापरेह्नरहतिपारणंनप्रा
प्नुयात्।रात्रौपारणस्यनिषिद्धत्वात्।अतोह्न्येवव्यतिपातां
तरपारणंवुवच्छास्त्रपूर्वेद्युर्दिवसेसायंकालादियोगंप्र
योजकंस्त्वयति।तस्मादिक्षाद्यादियोगवत्उपवासादौ
पूर्वविद्धोग्रहीतव्यः।दानव्रतयोरुदयव्यापीपरिग्राह्यःभा
द्रस्यतुकर्मकालव्यापीनिर्णेतव्यंववबालवादिकरणा
नांतिथ्यर्द्धपरिमितत्वेनदिनद्वयव्यापित्वासंदेहोनास्ति।त
स्मादुदयस्तमयेवायस्मिन्दिनेकरणसद्भावस्तस्मिन्नेव
दिनेतत्रकर्मानुष्ठेयं।यदातुसायंसंध्यामारभ्यपरेह्नरुदया

त्रागेव करणं समाप्येत तत्र कथमिति चेत् नद्याकरणोक्त
न्यायेन सर्वकरणेषु निर्णय इति क्रमः नद्याकरणन्यायेषु
च निर्णयोऽस्माद्विष्णुरहस्यपुराणेऽस्माभिर्व्याख्यातः पद्मते यस्मिन्दि
ने नवैवेद्यात्तस्मिन्नहनि नारत उपवासस्य नियमं कुर्या
न्नारी नरोऽपि वा यदि रात्रौ नवैवेद्यं दृष्टिश्चेत् एकनक्तं दिनद्वयेऽपि का
र्यं तेनोपवासः स्यादिति पौराणिको विधिः प्रहरस्योपरि य
दास्या दृष्टिः प्रहरत्रयं उपवासस्तत्कार्य एकनक्तं ततोनधो
ति उदयान्नाद्यारभ्य यावदस्तमयं विद्धैर्नवति तदाऽस्त
दिनव्याप्तनद्या अन्यावेध्यैकदेशव्याप्तेः सद्भावादुपवासो
नुष्ठेयः अन्यथैतन्नैकदेशव्याप्तेरप्यवोभौ विवक्षितः
तस्मिन्पक्षे समनन्तरातीतवत्रिनादिनद्वयेऽपि एकनक्तकार्यं यस्तु

नतां नुक्तिगर्भेऽहन्याचमेशन जायते अथवान्ने पिनद्या याः काम्यतोवाग्यतः
नद्याव्रतं संकल्पाहोरात्रमुपोषितुन शक्नुयात् असौ नद्या
युक्तघटिकासुजोजनंत्यजेत् नद्यारहितकालेतु त्यक्तोपवासं
न्त्रीयतेतथाचास्माभिर्व्याख्यातत्वात् स्नातःसंपूजितामेव ब्राह्मणं
चस्वशक्तितः शुचिः नकिंविद्धक्षयेत्प्राज्ञोयावद्धद्राप्रवर्त्तते
इति अहश्चरमनागेयदानद्राप्रवेशः तदानीमेकदेशेन न
द्रायोगिनोदिनस्यतद्व्रताईत्वात् अशक्तस्य नद्राप्रवेशात्पा
गेवभोजनेप्राप्तेसतिअयुक्तेनपूजादेरनुष्ठयत्वान्नद्यारहि
तेपिकालेपूजादिकंनविरुद्ध्यतेयदातुनद्रायाअंतेसुक्तेतदाकर्म
कालव्याप्तिशास्त्रत्वात्प्रदोषतकालएवपूजादिकंकर्त्तव्यं
पक्षद्वयेपिनद्रायुक्तघटिकासुनकिंविद्धक्षयेत् तावतानद्राप

वासःपूर्यते।बवादिकरणपुक्स्यापिविशेषस्यशास्त्रेनानु
क्तत्वात्॥उद्दायांष्टकृत्स्यन्यायस्यातिक्रमेकारणाभावाच्चा
यंनिर्णयप्रकारःसर्वोपियोजनीयःनक्षत्रनचतिथियोग
करणानांपंचागांतःपातिनानिर्णयंकृत्वानदतःपातीशास्त्री
यकर्मोपयोगात्वारःकृतउपेक्षितइतिशंकनीयं।अहोरात्र
परिमितत्वनियमेनवासरसंदेहाभावात्।तदेवनक्षत्रयोगक
रणानिनिर्णितानि॥॥अथसक्रांतिनिर्णीयते॥॥मेषादिषुद्वा
दशराशिषुक्रमेणसंचरत्सूर्यस्यपूर्वस्याद्राशेरुत्तरराशौ
संक्रमणंप्रवेशःसंक्रांतिः।अतस्तद्राशिनामपुरःसरंसासंक्रा
तिर्व्यपदिश्यतेराशयश्चमेषवृषभमिथुनकर्कटकसिंहकन्या
तुळावृश्चिकधनुर्मकरकुंभमीनंनामकाःतेषुद्वादशसुवलारिति

कारणिनवंतितत्रैकस्मिन्त्रिकेक्रमेणचरस्थिरद्विस्वभावास्त्रि
योराशयःतथाचचतुर्थत्रिकेषुयेमध्यमाःषभसिंहवृश्चिककुं
भनामकाःस्थिरराशयश्चत्वारस्तेषांविषुपदंनामस्मृतिषुप्र
सिद्धं।येत्वंतिमामिथुनकन्याधनुर्मीनिनामकाद्विस्वभावाराशा
यस्तेषडशीतिमुखसंज्ञकाःयेपुनःप्रथमेमेषकर्कटतुळाम
करूपाश्चराशयस्तेषुमेषतुलेविषुवसंज्ञकेकर्कटमकरावय
नसंज्ञकौ।तदेतत्सर्ववृद्धवसिष्ठआह।अयनेद्वेविषुवेद्वेचतस्रः
षडशीतयः।चतस्रोविषुपद्यश्चसंक्रांत्याद्वादशास्मृताः॥कर्कट
संक्रांतीद्वेउदग्दक्षिणायने।विषुवेतुतुलामेषौगोलमध्येततः
परं।कन्यायांमिथुनेमीनेधनुष्यपिरवर्गतिषडशीतिमुखाःप्रोक्ता

षडशीतिगुणाःफलैःवृषवृश्चिकसिंहेषुकुंभेचैवरवेर्गतिः।ए
तद्विषुपदंनामविषुवादधिकंफलैरिति।विषुवान्त्यायनान्या
युक्तंराशिचक्रगोलइत्यभिधीयते॥तत्रमेषाख्यस्यविषुवस्य
कर्कयख्यस्यायनस्यमध्येविषुपदसंज्ञकोवृषऊः।षडशीतिसं
ज्ञकंमिथुनंवर्तिष्टति।तथाचकर्कटायनस्यतुलाविषुवस्यच्म
ध्येसिंहकन्येस्थिते।एवमप्यन्युदाहार्यंयथोक्तं।गालवोप्या
हास्थिरेविषुपदंषडशितिमुखंद्वितनुंचतुलामेषविषुवं
तुर्यंदक्षिणायनमृगेसौम्यकंसूर्यइतिनराद्दावाच्यराशिः।
स्थिरराशिस्थितेसूर्येसतिविषुपदंभवति।द्विस्वभावराशौसू
र्यस्थितेसतिषडशीतिमुखंभवतिचतुलामेषद्वयेसूर्यस्थि

तेसतिविषुवंभवतिचतुर्थेकर्कटकेदक्षिणायनंमृगेमक
रेसौम्यकंसोमदिङ्नामकंउत्तरायणंतैरेतैःसज्ञाभेदैःरा
शयोव्यवह्रियंतेतद्राशिसंबधात्तासंक्रांतिनामपितान्ये
वनामानितासुचसंक्रांतिसुहोमस्नानादिकंअन्वयव्यति
रेकाभ्यांवचनाच्यो।शातातपः।संक्रांतीयानिदानानिह
व्यकव्यानिदाहविः।तानिनित्यददात्यर्कःपुनर्जन्मनिजन्म
निरविसंक्रमेणपुण्येनस्नायाद्यदिनमानवः।सप्तजन्म
सुरूपीस्यादुःखभागीहतायते।स्नानदानाद्यंगभूतसं
क्रांतिकालेमुख्यकालस्यासंभवादनुकल्प्यएवादर्तव्यः।त
दाहदेवलः।संक्रांतिसमयःसूक्ष्मोदुर्ज्ञेयःपिशितेक्षणैःतद्योगा

दप्यधश्चोर्द्धं त्रिंशन्नाडयुपविशतइति दिवसधानरात्रित्य
नात्मसंश्लिष्टयोःपूर्वोत्तरराश्योर्मध्येसूर्यःपूर्वराशिंपरित्य
ज्ययावतीकालभेदेनोत्तरराशिंप्रविशतिसतेशोयोगदृष्टिं
विनामांसदृश्यादुर्लक्ष्यः।अतोनुष्ठानेमुख्यसंक्रांतिकालासं
भवात्तत्संक्रांतिसंबंधिनौपूर्वोत्तरकालौगृहीतव्यौसंक्रांतेः
पूर्वोत्तरयोःकालयोःएकैकस्मिन्त्रिंशद्घटिकाःपुण्याइति
सामान्येनोक्तं।तत्रविशेषमाहचंद्रवसिष्ठः।अतीतानागते २३२।।
पुण्येदेहदग्दक्षिणायने।त्रिंशत्कर्कटकेनाऽऽमकरविंश
तिःस्मताइति।उदगयनतीमतंसतुण्यनवतिःदक्षिणाय
नमनागतंपुण्यत्रिंशदित्यादिनातदेतत्स्पष्टीक्रियते।कर्क
टाख्यादक्षिणायनात्प्राचीनात्रिंशद्घटिकाःपुण्याःमकरा

ख्योत्तरकालीनाविंशतिघटिकाःपुण्याः।बृहस्पतिरपि
अयनेविंशतिःपूर्वीमकरेविंशतिःपरावर्तमानेतुलामेष
नाऽस्तुभयतोदशेति।नचात्रत्रिंशद्घटिकावादिनासा
मान्यवचनेनविरोधःशंकनीयः।सामान्यावचनस्याभ्य
नुज्ञापरत्वात्।विशेषवचनोक्तोघटिकासंकोचएवप्रश
स्तः।यामाःसन्निहितानाऽभ्यस्तास्तःपुण्यतमाःस्मता
इतिदेवलोनानुलोमात्।केनापिनिमित्तेनसंन्निहितघटि।।
काद्यनुष्ठानासंभवेत्रिंशद्घटिकाःपरमावधित्वेनाप्यनु
ज्ञायंतेषडशीतिमुखतोपिदीर्घमवधिमाहवृद्धवसिष्ठः।

षडशीत्यामनीतायांषष्टिस्थत्वासुनाडिकाइतिविष्णुप
द्यांप्रशस्तंकालंसएवाहपुण्यायांविष्णुपद्यांचप्राक्प्रशस्यादि
पिषोडशीतिसंक्रांतीनांपूर्वोत्तरौपुण्यकालौनिर्णीतौतथा
श्चसंक्रांतयःकदाचिदह्निभवंतिकदाचिद्रात्रौभवंतितद्दि
नानुष्ठानमेदमाहबृहद्वशिष्ठोअह्निसंक्रमणेपुण्य
महःकृत्स्नंप्रकीर्तितंरात्रौसंक्रमणेभावोदिनार्द्धस्नानदा २३१
नयोः।अर्धरात्रादधस्तस्मिन्मध्याह्नस्यापरिक्रिया॥उर्द्ध
संक्रमणेचोर्द्धमुदयात्स्मरेदयं॥पूर्णेचेदर्द्धरात्रेतुयदा
संक्रमतेरविः।प्राङ्मुहूर्तंदिनंहयंपुण्यंमुक्तामकरकर्कटाइति।
अह्नियदासंक्रांतिर्भवतिकृत्स्नस्यापुण्यत्वंवदतावचनेना

र्थोद्वात्रौस्नानदानादिकंप्रतिषिद्धतेएवंसदुदयानंतरस्ताविनि
उत्तरायणेनपूर्वभागेप्रशस्तेवाधिकोत्तरभागेनुष्ठानंस
वति।अस्तमयप्राचीनक्षणत्वाविमुत्तरायणेचोत्तरभाग
प्राशस्त्यंपरित्यज्यपूर्वभागेनुष्ठानंयंउत्तरभागप्राशस्त्यं
तुमध्याह्नादिसंक्रमेणविषयंतत्राहन्येवहेयोपादेययोः
पूर्वोत्तरभागयोसंज्ञावादनेनैवन्यायेनकर्कटेपितामध्याह्नो
विनिपूर्वभागप्राशस्त्यंभवति।अस्तमयप्राचीनत्वाविष्णुषडशी
तिमुखेष्वपिउत्तरभागप्राशस्त्यंमकरज्यायेनपूर्वभाग
प्राशस्त्यंविधातव्यंउदयानंतरत्वाविषुमध्याह्नत्वाविषु
वतेषुवचनोत्तरविरोधेनोत्तरभागएवानुष्ठानसंज्ञावात्तद्दिर

र्द्धं पूर्वनागप्राशस्त्येन विधीयेते उत्तरनागप्राशस्त्ये घेतेषु वि
षुवत्विष्णुपदेषुमध्याद्ऊनाविषुपूर्वोत्तरत्रवास्वेच्छयानुष्ठा
तव्यं उदयानंतरनाविषुतेषु पूर्वप्राशस्त्यंबाधतेअस्तमय
प्राप्तेषुतेषूत्तरप्राशस्त्यबाधदृष्टेति विवेकः एतद्वचनानुसारेण
यस्यसंक्रमणस्ययस्मिन्नागेऽनुष्ठानंतस्मिन्नेवनागेव्यव
हितानाद्यःपुण्याद्दृषत्संन्निहिताःपुण्यतराःअत्यंतसंन्निहि २३४।
ताःपुण्यतमाइतिद्रष्टव्याःयदारात्रेर्नानोःसंक्रमणंभवति।
तदातस्यारात्रेःपूर्वस्योत्तरस्यवादिनस्यार्द्धप्रहरद्वयस्यानदा
नयोःपुण्यंकुतःपूर्वदिनंकुत्रोत्तरदिनमितिवीक्षायांतदुभय
मर्द्धरात्रादित्यनेनव्यवस्थाप्यते।रात्रेरर्द्धमर्धरात्रःद्वितीयप्र

नानुग्रहलाभात्तत्रैवानुष्ठातव्यंविष्णुवयोर्विष्णुपदेषुमा
तिथिकवचनंनियामकतयवचनस्यपूर्वोत्तरनागयोः
साम्येनप्राशस्त्यप्रतिपादकत्वात्प्रकृतंवचनंचपूर्वोत्तर
दिनसाम्येनवित्तेतस्मात्पूर्वस्मिन्नुत्तरस्मिन्वास्वेच्छया
नुष्ठानमितिविकल्पते।अमनयोस्तुप्रकारांतरवक्ष्यते।अ
यनव्यतिरिक्तासुदशासुसंक्रांतिषुमध्यरात्रादूर्द्धंप्रवृत्तासु २३५।
रेष्वनुष्ठानमित्यत्रनकोपिसंदेहः।अर्धरात्रात्पूर्वंप्रवृत्ता
सुदशासुमध्येषडशीतिव्यतिरिक्तानीषणांपूर्वदिनेनुष्ठान
मित्यत्रापिनास्तिसंदेहःषडशीत्यानुप्रकृतवचनेनपूर्वद्यरनुष्ठा
नंप्राप्तंषष्ठिघटिकाप्राशस्त्यप्रतिपादकप्रातिस्विकवचनेनपर
द्यः प्राप्नोतिअतःसंदेहेसतिपूर्वद्यरनुष्ठानमितिद्रष्टव्यो निर्ण

स्यवरमघटिकात्तीयप्रहरण्यप्रथमघटिकेत्येवंघटिका
द्वययुक्तःकालःतस्मादर्द्धरात्रादधःसंक्रमणेसतिपूर्वदिने
मध्याद्दूस्थापरितेप्रहरद्वयक्रियाकार्या।अर्द्धरात्राद्दूर्द्ध्व
संक्रमेणेसतिउत्तरस्मिंकालीनादुयोर्दूर्ध्वप्रहरद्वयंपुण्य
पूर्णेर्द्धरात्रेयथोक्तघटिकाद्वयेसंक्रांतौपूर्वोत्तरदिनद्वयंक
स्मात्पुण्यंतदुक्तंनविरोधात्तर।संक्रमस्तुनिशीथेस्यात्पश्चामाः
पूर्वपश्चिमाःसंक्रांतिकालोविज्ञेयस्तत्रस्नानादिकंवेदिति
अत्रेयंव्यवस्था।अर्द्धरात्रेयदाषडशीतिःस्यातदानीमेतद्व
नानुसारेणपूर्वोत्तरदिनद्वयस्यपुण्यत्वाद्यथेस्मिंकोविकल्पः
प्राप्नोतितथापरदिनेषष्टिघटिकाप्रतिपादकप्रातिस्विकत्व

यःकुतःविष्णुपद्योधनुर्मिनिर्यायुर्व्यासुवैयदा॥पूर्वोत्तरम
गतेरात्रौनानोःसंक्रमणंनवेत्।पूर्वोल्लंघनाज्यःपुण्याःप्रोक्ता
मनीषिभिः।अपरोल्लंघनेपंचैवस्मृतैःस्नानेचकर्मणीतिस्मृतेः
यदारात्रौपूर्वेनागतेविष्णुपदीषडशीतिसंक्रमणंनवेत्तदा
पूर्वेद्युरपरोल्लंघनेपंचघटिकाःपुण्याउत्तरेनागतेसंक्रमणेपरेद्युः
पूर्वोल्लंघनाज्यःपुण्याःनचैवंसतिप्रहरद्वयपुण्यत्वविरोधइतिवाच्यं।पंचनाडिकावचनेपु
ण्यातिशयस्यविवक्षितत्वात्।अतःप्रहरद्वयवाक्यंपु
ण्यमात्राभिप्रायमेतस्मिन्नेवविषयेदेवीपुराणेपठ्यते।
असंपूर्णेऽर्द्धरात्रेतुउदयेपिच॥नानाह्नेनास्करेपुण्यमपू

र्वीदले। अर्धरात्रे त्वसंपूर्णे दिवा पुण्यमनागतं।
संपूर्णेऽनयोर्जयमतिरिक्ते परेह नीति। अत्र सास्कर
श्च द्वौ न सूर्ययुक्तं दिनमुपलक्ष्यते यदा नास्कारश्चा
न सूर्यरूढः किंतु यौगिकः नासंकरातीति न्यज्यत्तिसंज
वात्। तथा चसूर्यइवदिवसेपि सास्कर श्चोमुख्यत्तस्या
पि नासंप्रत्यधिकरणकारकत्वात् सास्करे दिवसे विद्यमा
नंप्रमाणं प्रहरत्रयतुष्टयंतस्याद्धं प्रहरद्वयं। आदित्यास्त ।३६।
मयस्योपरितनः आगामिसूर्योदयात्प्राचीनः कालोरा
त्रिः उदस्योपरिअस्तमयात्प्राचीनः कालोदितं। उदयास्त
मयकालौसंधिरूपतयापूर्वोक्तयोरात्रिदिवसान्यापृथगि
त्येकं। रेखामात्रस्यापिसूर्यमंडलाशयस्यदृश्यमानतया

दिवसांतःपतितावित्यपरे। सर्वथापिरात्रौनतयोरंत
र्नीवः। सारात्रिस्त्रिधानिद्यतेमध्यवर्त्तिघटिकाद्वयात्म
कंरकोनागः। तस्मात्पूर्वोत्तरौभागौ॥ तत्रपूर्वभागोऽसं
पूर्णोऽर्द्धरात्रेइत्यनेनविवक्ष्यते। तस्मिन्यदासंक्रांतिर
स्तदानींसूर्योस्तमयेप्रत्यासन्नंयत्पूर्वदिनस्योत्तरार्द्धंतत्पुण्यं
अपूर्णेरात्रौदलेइत्यनेनार्द्धरात्रानंतर्नीवीरात्रिभागेविव
क्षितः पूर्वोत्तरयोर्निशीथदलयोरेकैकस्याघटिकायाअर्द्ध
रात्रकालार्थंपृथक्कृत्वादसंक्रांतिरंगंतव्यः तस्मिन्घटिका
न्यूनेपरभागेयदासंक्रांतिस्तदानींनाविसूर्योदयेप्रत्यासन्न
दिनार्द्धंपुण्यं। अयमेवार्थोद्वितीयश्लोकेनप्रपंच्यते। घटिक

न्यूनत्वेसंपूर्णरात्रेः पूर्णसागेयदासंक्रमणंभवतितदाय
द्यपिदिवासंक्रमणमेनागतंतथापित्स्यादिवसस्यात्तरा
र्द्धंपुण्यंसंपूर्णोऽर्द्धरात्रेघटिकाद्वयात्मकेनिशीथेसंक्रमणं
नचेत्तदानीपूर्वोत्तरयोर्दिनयोःपुण्यंज्ञेयं।अतिरिक्तपरमा
गेसंक्रांतौपरेहनिपूर्वोर्द्धंपुण्यंदिवलोपि।आसन्नसंक्रमंपु
ण्यंदिनार्द्धंस्नानदानयोः।रात्रौसंक्रमणेभानोर्विषुवत्पयने
दिवेति।रात्रौभानोःसंक्रमणंविषुवन्नामकेजातेसतिसं
क्रमणप्रत्यासन्नदिनार्द्धंपुण्यं।पूर्वरात्रसंक्रमणपूर्वद्यु
नस्यपूर्वार्द्धमकरेउत्तरार्द्धं।एतच्चमध्यंदिनायनविषयं।
उदयास्तमयप्रत्यासन्नेअयनेपूर्वोत्तरभागप्राशस्त्यापे
क्षयाकृत्स्नदिवसपुण्यत्वनिर्णयःपूर्वमेवोक्तः।अयनन्यति

रिक्तेषुदशसुसंमेक्रमेणषुरात्रिगतेषुयोनिर्णयः।तंसर्वे
पर्युदसितंतद्वचनशेषमुक्तामकरकर्कटाविवित्तिव
त्तिं।यायासन्निहितानाड्यस्तास्ताःपुण्यतमाइत्युक्तं।
नसामान्यवचनेनसर्वेषुरात्रिसंक्रमणेषुरात्रावेवानुष्ठा
नंप्रसक्तंतयोर्यदशसुसंक्रांतिषुदिवानुष्ठानविधायमकर
कर्कट्योस्तत्पर्युदासेसतिपूर्वप्रसक्तंरात्रावनुष्ठानमेवपर्यव
स्यति।एवंसतिरात्रौसंक्रांतिस्नानमप्यपगच्छतीयाज्ञवल्क्य
वचनस्यापिकश्चिद्विषयःसंपद्यते।तथाचयाज्ञवल्क्यः।राहुद
र्शनसंक्रांतिविवाहात्ययवृद्धिषु।स्नानदानादिकंकार्यंनिशीथो
म्यव्रतेषुयेति।सुमंतुरपि।रात्रौस्नानंनकुर्वीतदानंचैवविशेषतः।

नैमित्तिकंवकुर्वीतस्नानंदानंवरात्रिषुः यज्ञेविवाहयात्रायांया
त्रार्थिप्रेरेषुवश्रवणेवतिहासस्यरात्रौदानंप्रशस्यते।ननु
यथोक्तपर्युदासानुगृहीतेःपुण्यमत्ववादिदेवयाज्ञवल्क्यसु
मंतुववचनैमकरेकर्कटयोनिरयनुष्ठानप्रापणंशास्त्रांतर
विरुद्धंतथावसविष्णुतरः।मिथुनात्कर्कसंक्रांतिर्यदिस्यादंशु
मालिनः।प्रशस्तेवानिशीथेवाकुर्यादहनिपूर्वतः।कार्मुकंतु
परित्यज्यनरंसंक्रमतेरविः।प्रदोषवार्द्धरात्रेवास्नानंकुर्या
त्परेहनीनि।वद्धगार्ग्योपि।यदास्तमथवेलायांमकरंयाति
भास्करः।प्रदोषवार्द्धरात्रेस्नानंदानंपरेहनि।अर्द्धरात्रंतदू
र्द्धंवासंक्रांतौदक्षिणायने।पूर्वमेवदिनंग्राह्यंयावन्नोदयते
रविरिति।मैवं।नविष्णुतरगार्ग्यवचनेषुराज्यनुष्ठानप्रतिषे

धकल्पनेपर्युदासानुगृहीतवचनानामानर्थक्यंप्राप्नोति।
तस्माच्छास्त्रद्वयेनविकल्पप्राप्तौतत्तद्देशप्रसिद्धिनिष्ठावा
रेपाव्यवस्थाद्रष्टव्या।यथोक्तादशसंक्रांतीनायथोक्तेषु
पुण्यकालेषुमंदादिसंज्ञोपजीवनेनकस्मिंद्विरोषादेवीपु
राणेदर्शितः।द्वादशैवसमाख्याताःसमासंक्रांतिकल्पना।
स्पृधातुप्रयोक्तव्याएकैकंयथाशृणु।मंदामदाकिनीधांक्षी
घोराचैवमहोदरी।राक्षसीमिश्रिताप्रोक्तासंक्रांतिःसप्तधा
क्रमं।मंदाक्रमेषुवित्तेयामहोमंदाकिनीतथा।क्षिप्रेधांक्षां
विजानीयादुग्रेघोराप्रकीर्त्तिता।चरेमहोदरीज्ञेयाक्रूरे
त्वराक्षसीतथा।मिश्रितावैविज्ञेयामिश्रेऋक्षेसंक्रमे

द्विचतुःपंचसप्ताष्टनवद्वादशाएवंचक्रमेणघटिकाज्ञे
यास्तत्पुण्यपारमार्थिकाःअत्रसमाशब्दःसंवत्सरवाची
समासंबधिन्यःसंक्रांतिकल्पनामेषादीनांतावद्वादशैव
समाख्याताःतासुद्वादशसंक्रांतिष्वेकैकामंदादिभिःस
प्तभिर्नामभिर्व्यवहार्याःतानिचनामानिनक्षत्रविशेषोप
जीवनेनप्रवृत्तानितद्यथाःअश्वयुनक्षत्रेषुप्रारब्धासंक्रां
तिर्मंदाएवंमृदुक्षिप्रादिनक्षत्रेषुप्रारब्धासंक्रांतिक्रमणमं
दाकिनीधोक्ष्यादिनामभाग्भवतिरौद्रेपुष्यत्रयंचए
तानिचत्वारिनक्षत्राणिध्रुवाणिरवतिचित्रानुराधामृग
शीर्षाणिचत्वारिमृदूनिहस्ताश्विनीपुष्याश्चिजिनक्षत्रा

णिचत्वारिक्षिप्राणिःउत्तरात्रयंमघावेत्येतानिपंचो
त्तराणिःश्रवणपुनर्वसुस्वातिशतभिषग्निष्ठास्वात्याख्यानिपंच
चराणिःअश्लेषामूलार्द्राज्येष्ठाख्यानिचत्वारिक्रूराणिःकृति
काविशाखाभिन्याख्यानिमिश्राणिःसियसप्तधानक्षत्रव्य
वस्थाज्योतिर्ग्रंथेमदूक्तासोरेपठिताःक्षिप्रक्षिप्रमुग्रंचदा
रुणंचरमेवचःमृदुसाधारणंऋक्षंसप्तनदाःप्रकी
र्तिताःक्रूराश्विनीवाक्रतिनंतथाश्चिजिल्लघूनिपुष्यग
नेविभूषणेहिरण्यगर्भाधिपमुत्तरात्रयंध्रुवाख्यमेते
नवाक्षुनामृक्षंयुतेभानरण्यासहपूर्विकात्रयमघा
तथाग्राख्यमिदंनपंचकंतुजंगमंनैर्ऋतमेद्रमार्द्राभुवंति
तीक्ष्णानिहितानिसर्वदाःचराश्चपंचश्रवणपुनर्वसू

जले स्नानंवासवमानिलंतथा। मृदुनिपोक्षंसुरवर्द्धकी
श्वरंतथानुराधामतरस्मिदेवं। दुतोशनक्षेणसहस्त्रिदि
दैवमुशंतिसाधारणसंज्ञयस्मिन्निति। यथोक्तनक्षत्र वि
शेषोपजीवनेनप्रवृत्तमदादिनिःसृतनामभिर्युतमेषादि
संक्रांतौक्रमेणद्विचतुरित्यादिसप्तविधसंख्यायुक्ताना
ज्यःपुण्याइतियत्पुण्यंतत्रनास्तिसंदेहः। इत्यस्मिन्नर्थपा
रमार्थिकश्राद्धःप्रयुक्तः। मंदायाप्रत्यासन्नघटिकाद्वयं
पुण्यं। मंदाकिन्याघटिकाचतुष्टयंधोक्षजपंचदोरायांस
प्तकं। महादर्यामष्टकंराक्षस्यांनवकमिति। तायादशा
कंमेकसंक्रांतावुदाहृतः। सोयंप्रकारोवृषभादिषुकादश
सुसंक्रांतिष्वनुसंधेयः। दिविपुराणोदाहरणान्नाचीनग्रं
थः

द्येतत्तत्संक्रांतिषुपुण्यकालोनिर्णीयते। तस्मिन्नेवकेवलदे
वीपुराणोक्तद्विचतुरित्यादिकःपुण्यातिशयप्रतिपादकोवि
शेषादृष्टव्यः। नीलमतेषुसंक्रांत्यादीनांपुण्यकालेषुयत्कर्त्त
व्यंस्नानादिकंसर्वमेवशातातपवचनद्वयेनोदाहृतं। ब्रह्मपुरा
णेपिनित्यद्वयोरनयास्तथाविषुवतोर्द्वयोः। चंद्रार्कयोर्ग्रहणयो
र्व्यतीपातेषुसर्वसु। अहोरात्रोषितःस्नानमर्घ्यदानंजपादिकं
यत्करोतिप्रसन्नात्मातस्यस्यादक्षयंचतत्। अयनेविषुवेचैव
चंद्रसूर्यग्रहेतथा। कृतोपवासःसुस्नातःसर्वपापैःप्रमुच्यते॥
वृद्धवसिष्ठोपि। उपोष्यैवतुसंक्रांतौसुस्नातान्यर्चयेद्दिवा। प्रातः
पंचोपचारेणसकाम्यफलमश्नुते। अयनेविषुवेचैवत्रिरात्रो

षोषितो नरः। स्नात्वायः पूजयेद्धरिंसर्वान्कामान्समश्नुते। सप्तोपो
ष्य रवेर्वीरानादौस्नात्वातु संक्रमे। अर्कमभ्यर्चयेद्यस्तु सदु
रवी सुखमश्नुते। अयनातीपः। अयनादौसदादेयंद्रव्यमित्य
गृहेचयतः षडशीतिमुखेचैवविमोक्षश्चंद्रसूर्ययोरितिऊ
र्ध्वस्नानादिकर्तव्यस्यसंक्रांतिविशेषमुपजीव्यकालविशेष
माह। शातातपः। कुर्यात्सदायनेमध्येविषुपद्योर्विशेषतः। प
डशीत्यामतस्यानागस्नानादिविधिमाहतइति। गालवोपि।
विषुवतिदानंविषुपदेदक्षिणायनेवादोषडशीतिमुखेती
तेतथोदगयनेचसूरिफलमिति। अयनादिषुयत्रयावान्पु
ण्यकालःपूर्वैर्निर्णीतः। तत्रतावंतंकालंत्रिधाविभज्यमध्ये

विषुवतीत्याद्यवगंतव्यंतस्मिन्नपिमध्यादिभागेःसन्निहि
तानांपूर्वोदाहृतवचनेनपुण्यत्वंद्रष्टव्यंसंक्रांतिषुफलमा
हःनरद्वाजः। षडशीत्यांतुयद्दानंयद्दानंविषुवद्वये। दृश्यते
सागरस्यांतस्तस्यांतेनेवदृश्यतइति। चंद्रवसिष्ठः। अयने
कोटिपुण्यंचसहस्रंविषुवेफलं। षडशीत्यासहस्रंतुफलं
विष्णुपदेपुनरिति। मेषादिसंक्रांतयोयस्मिन्दिनेभवंतितस्मा
दिनात्पूर्वस्यैकादशादिनेभ्यः प्राचीनेदिनेमेषायनंवृषना
यनेमित्येवंतत्तन्नामांकितमयनंभवतितस्मिन्नयनेस्नाना
दिपुण्यकालमाह। जाबालिः। संक्रांतिषुयदाकालस्तदीये
प्ययनेतथा। अयनेविंशतिःपूर्वेमकरेविंशतिःपराइति।
मकरसंक्रांतिसंबंधिषुषयनेषुतत्तत्संक्रांतिवत्पुण्ये

व्यतिरिक्तेकादश

कालो वर्णतव्यः।मकरसंक्रांतिसंबंधिनिलयनेसंक्रांतिवैल
क्षण्यं।तद्यथा।मकरायनेप्राचीनाविंशतिर्घटिकाःपुण्या
मकरसंक्रांतेःपाश्चात्याविंशतिर्घटिकाःपुण्यानकेवलमादि
त्यस्यैवसंक्रमायनेपुण्यकालः।किंतुसर्वेषामपियहाणां
नक्षत्रराश्योरविसंक्रमेस्युर्वीक्षारस्तादृसर्वदृनाड्यःपु
ण्यास्तथेंदोस्त्रिधराफलेयुर्गएकेवनाडीमुनिभिःप्रभोक्ता २४२।
नाड्यश्चतस्रःसपलाःकुजस्यबुधस्यतिस्रःपलविंशयु
क्ताः।अर्धार्धनाड्यःपलसप्तयुक्तागुरोश्चतस्रःसपलाश्च
शुक्रोदिनागनाड्यःपलसप्तयुक्ताःशनेश्चरस्यानिहिताश्च
पुण्याः।आद्यंतमध्येजपहोमदानंकुर्वन्नवाप्नोतिसुरेंद्रधामे

ति।अयमर्थः।आदित्यस्यराशिनक्षत्रगमनेऽर्वाक्परतश्च
षोडशघटिकाःपुण्यकालः।तथाबुधस्यतिस्रोघटिकाश्च
तुर्दृपुण्यकालः।बृहस्पतेरपिसार्द्धचतस्रोघटिकाःप
लानिसप्तचपुण्यकालः।शुक्रस्यचतस्रोघटिकाःपलमेकं
चपुण्यकालः।शनैश्चरस्यद्वेशीतिर्घटिकाःपलानिसप्तच
पुण्यकालः।इतिकोदेनागरखंडेएकोनेतेमयाप्रोक्ताः।
कालाःसंक्रांतिपूर्वकाः।नेतेषुविद्यतेविघ्नायतश्चाक्षयसंज्ञि
ताः।अश्रद्दयापियद्दत्तंकुपात्रेभ्योपिमानवैः।अकालेपिहि ज्यो
तत्सर्वंसत्यमक्षयंव्रजेदिति।इतिसंक्रांतिनिर्णयः॥ ॥५॥
अथग्रहणं॥तत्रबृहज्जार्ग्यः।पूर्णिमाप्रतिपत्संधौराहुःसंप्र

र्णमंडलेग्रसतेचंद्रमेर्कवद्दर्शप्रतिपदंतरेतितत्र प
र्वणोऽतिमभागःस्पर्शीकालःप्रतिपद आद्योभागो मो
क्षकालश्चातदुक्तंब्रह्मसिद्धांते। यावत्कालःपर्वणोंतेता
वत्प्रतिपदादिमःरवीदुग्रहणानेहासपुण्यामिश्रणा
नवेदितिग्रहणानेहाग्रहणकालःतत्रकर्त्तव्यमाह॥
दृद्ववशिष्ठःगंगातोयेतुसंप्राप्तेइंदोःकोटीरवेर्दशगु
णांकोटिप्रयत्नेनसम्यग्दत्तेनयत्फलंगंगास्नानेतत्फलस्या
द्राहुग्रस्तेनिशाकरे॥पुनस्तत्रदशासंख्यमुदाहृतमितिअ
स्यश्लोकद्वयस्यप्रथमार्द्धमपेक्षितपदाध्याहारेणयोजनीयं
तद्यथा।इंदोर्ग्रहणसंप्राप्तेसतिगंगातोयंअवगाहनंगादा

नकोटिसमंभवति।रवेर्ग्रहणेततोदशगुणंफलं।अयमेवा
र्थउपरितनेनार्द्धेनस्पष्टीकृतः।व्यासोपि।इंदोर्लक्षगुणंपुण्यं
रवेर्दशगुणंततः।गंगातोयेतुसंप्राप्तेइंदोःकोटीरवेर्दशगु
णांकोटिसहस्रस्यत्फलंलभतेनरः।तत्फलंजाह्नवीस्नानं
राहुग्रस्तेनिशाकरे।दिवाकरेतुस्नानस्यदशासंख्यमुदाहृतं।
चंद्रसूर्यग्रहेचैवयोवगाहेतजाह्नवीं।सस्नातःसर्वतीर्थेषुकिम
र्थमटतेमहीं।गंगाव्यतिरिक्तमहानदीतोयेलक्षगुणदशलक्ष
गुणत्वं।गंगातोयेतुकोटिगुणदशकोटिगुणत्वं।ब्रह्मपुराणे
पि।तिस्रोनद्योमहापुण्यावेणीगोदावजाह्नवी।गोहरीशां
घ्रिकात्प्राप्तागंगेतिहिकीर्तिताहरिश्चर्द्दशाच्चहरीशो।अ

धिः पादः कंधिरः ॥ अं धिश्च कंच अधिकहरी त्यपोरं धिकंहरी
त्यां धिकोहरेः पादादीश्वरस्य शिरसः गोत्रमिं प्राप्ता गंगा
यद्यपि जाह्नव्येवं तादृशी ॥ नतु वेणी गोदेतथापि क्षत्रिणो
गच्छंतीतिन्यायेन जाह्नव्यासहनिर्दाष्टयोस्तयोरपि गंगा
त्वमविरुद्धं ॥ यद्वा जाह्नवीजलमेवकेनचिन्निर्मलेब्राह्मगि
रिवायुगियोरुद्भूतमितिकुलातयोरपि मुख्यमेवगंगा
त्वं ॥ तासुगंगासुस्नानंमुख्यतदसंभवेनूद्यतरेषुस्नाया २७॥
तूक्तमहाभारतेः गंगास्नानंप्रकुर्वीतग्रहणेचंद्रसू
र्ययोः महानदीषुवान्यासुस्नानंकुर्याद्यथाविधीतिमहान
द्योब्रह्मपुराणेदर्शितः गोदावरीनीतुंगभद्राचवेणिकाता

परथी ।

पीपयोस्तीविंध्यस्यदक्षिणेतुप्रकीर्तिताः ॥ नागिरथीनर्मदाच
यमुनाचसरस्वती ॥ विशोकावितस्ताचविंध्यस्यात्तरस्तथेति ॥
महानद्यस्तुवेकल्पांतराण्याहुः शंखः ॥ वापीकूपतडागेषुगि
रिप्रस्रवणेपिवा नद्यांनदेदेवखातेसरसीष्वेतांवुनिऊलो
दकेनवास्नायात्ग्रहणेसोमसूर्ययोरितिएतत्सर्वमनित्यप्रत्या
हाव्यासः सर्वगंगासमंतोयंसर्वेब्रह्मसमोद्विजः सर्वेन्ने
मिसमंदानंग्रहणेसोमसूर्ययोरिति ॥ उल्लोदकस्यातुरविषय
त्वंव्याघ्रआहाआदित्यकिरणैःपूतंपुनःपूतंचवह्निना ॥ अतो
व्याध्यातुरः स्नायाद्ग्रहणेवोष्णवारिणीति ॥ गंगातोयमारब्ध्यं
उल्लोदकांतेष्वुत्तरोत्तरस्यानुकल्पत्वमुक्तं ॥ एतदेवाभिप्रेत्यो

क्षोदकादिषु समुद्रजलांतेषु उत्तरोत्तरस्य प्राशस्त्यमाह कैर्म
दुक्तैः शीतमुष्णोदकात्पुण्यं मपारक्यं परोदकात् ॥ मिष्टमु
द्धतात्पुण्यततः पुण्यं महानद्यंबु पावनं ॥ प्रश्रवणोदकं ततोपि
सारसं पुण्यंततः पुण्यनदीजलं ॥ तीर्थतोयंततः पुण्यमहानद्यं
बु पावनं ॥ ततस्तातोपि गंगांबु पुण्यं पुण्यस्ततो बुधिरिति ॥ मास
विशेषेण नदीविशेषादीपुराणेलिहितः ॥ कार्त्तिकेग्रहणं श्रेष्ठ
गंगायमुनसंगमे ॥ मार्गेसुग्रहणं प्रोक्तं देविकायां महामुनेः ॥
पौषेतुनर्मदापुण्या माघेसन्निहतासुना ॥ फाल्गुणेवरुणा
पुण्या चैत्रेपुण्या सरस्वती ॥ वैशाखेतुमहापुण्या चंद्रभाग
सरिद्वरा ॥ ज्येष्ठेतुकौशिकीपुण्या आषाढेतापिकानदी ॥ श्रा

वणेसिंधुनामातुतथा भाद्रेतुचंद्रिका ॥ आश्विनेसरयूःश्रे
ष्ठा ॥ तथा पुण्यातुनर्मदेति ॥ ग्रहणविशेषस्त्वेवं निहितः ॥
गोदावरीमहापुण्या चंद्रेराहुसमन्विते ॥ सूर्येचराहुणाग्र
स्तेमाघ्रतेमहामुने ॥ नर्मदातोयमासंस्पृश्य कृतकृत्यास्त
र्वंतिते स्नानवस्मरणादिष्वपिपुण्यमाहुः ॥ स्मृत्वाशत्रुफलं
दृष्ट्वा सर्वौघनाशनं ॥ स्नातमेघजलेवा गोमधपुण्यतुपी
त्वासौत्रामेलेनेतरस्नात्वावाजिमखंपुण्यं प्राहुर्याद्वि
चारतः ॥ रविचंद्रोपरागेतु अयनेवोत्तरेतथा ॥ क्षत्रविशेष
माह ॥ गंगाकनखलेपुण्यं प्रयागःपुष्करंतथा ॥ कुरुक्षेत्रंमहा
पुण्यं राहुग्रस्तेदिवाकरे ॥ इति ॥ ग्रहणेश्राद्धं विहितं लिंगपुरा

णे व्यतीपातक्षणे यावान्चंद्रसूर्यग्रहक्षणः गजच्छाया
तु सा प्रोक्ता पितृणां दत्तमक्षयमिति महाभारतेपि सर्व
स्वेनापि कर्त्तव्यश्राद्धं वै राहुदर्शने अकुर्वाणस्तु नास्तिक्या
त्पंकेगौरिव सीदतीइति ऋष्यशृंगोपि चंद्रसूर्यग्रहयुक्त
श्राद्धं विधिवदाचरेत् तेनैव सकलादत्ता पृथ्वी विप्रस्यवेक
रइति विष्णुपुराणेपि राहुदर्शनदत्तं हि श्राद्धमाचंद्रतारकं
गुणवत्सर्वकामीयं पितृणामुपतिष्ठतइति ग्रहणेरात्रावपि
स्नानादेर्निषेधः तथाच स्नातातपः स्नानं दानंतपः श्राद्ध
मनंतं राहुदर्शने आसुरीत्रीणि रन्यत्रतस्मात्तु परिवर्ज
येत् इति देवलः [illegible] दानंच सूर्यस्यग्रहणे दिवा सोम
स्यापि तथारात्रौ स्नानं विधीयते इति श्राद्धकृत्यं कूर्मपुराणेपि न

तथा स्नानंच २ पानं

मित्तिकंतु कर्तव्यंग्रहणे सोमसूर्ययोः बांधवानांतु मरणेनार
की स्यादतोन्यथा काम्यानिचैव श्राद्धानिरात्रौ स्यंतेग्रहणादि
ष्वितिवारविरुषयोगे फलातिशयमाहव्यासः रविग्रहेसू
र्यवारे सोमसोमग्रहेतथा चूडामणिरितिख्यातस्तत्रानंतफ
लंभवेत् वारेष्वन्येषुयत्पुण्यंग्रहणेसोमसूर्ययोस्तत्पुण्यं को
टिगुणितंग्राससंज्ञेपुण्येस्मृतमितिअतिथिप्राप्त्यादिवत्ग्र
हणस्यापि श्राद्धकालत्वमाहमार्कंडेयः विशिष्टब्राह्मणे प्रा
प्तेसूर्येंदुग्रहणदिनेजन्मर्क्षग्रहपीडासुश्राद्धंकुर्यात्तथेत्यर्थ
तिअत्रश्राद्धंनान्नेनकिंतुहेमादिनातदाहबोधापनंअन्यानावे
द्विजानावेप्रवासेपुत्रजन्मनिहेमग्राहंसग्रहेवकुर्यात्क्षुद्रःसदेव
द्विजःस्नातातपःआपद्यनाप्नोतीर्थेचंद्रसूर्यग्रहेतथाओमस्रा

द्विजोदद्यात्सदोदद्यात्सदेवहि। आशौचिनोपिग्रहणस्ना
नादिनिषिद्धंतथाचवृद्धवशिष्ठः। सूतकेमृतकेचैवनदोषा
राहुदर्शने। तावदेवभवेच्छुद्धिर्यावन्मुक्तिर्नदृश्यतइति॥इयं
चश्रुतिःसर्वस्मार्त्तविषया। एतदेवाभिप्रेत्यव्याघ्रपादः। स्मा
र्त्तकर्मपरित्यागोराहोरन्यत्रसूतके। श्रौतकर्मणितत्कालंस्ना
तःशुद्धिमवाप्नुयादितियुनुग्रहणनिमित्तमाशौचंतत्स्नान
न विरुध्यते। तदुक्तंब्रह्मपुराणे। आशौचंजायतेतस्मात्सग्रहणंव २७।
दंसूर्ययोः। राहुस्पर्शेतियोःस्नात्वास्नानादीकल्पतेनरइति। ष
ण्ढोन्मत्तेपि। सर्वेषामेववर्णानांसूतकेराहुदर्शने। स्नात्वाकर्मा
णिकुर्वीतिश्रुतमन्नंविवर्जयेदिति। आर्द्रतयोःस्नानंविहितं।
स्मृत्यंतरेपि। ग्रस्यमानेनवेस्नानेग्रस्तेहोमोविधीयते। मुच्य

मानेनवेदानंमुक्तेस्नानंविधीयतइति। होमदानदेवार्चनमपिस्ना
नवद्यमध्येकार्यं। तदुक्तंब्रह्मवैवर्त्ते। स्नानंस्यादुपरागादौमध्येहो
मःसुरार्चनमितितत्कालेस्नापादिकेनकुर्यात्। तदुक्तंशिवरहस्ये।
सूर्यस्यग्रहणंयावत्तावत्कुर्याज्जपार्च्चनं। नस्वपेन्नचभुंजीत
स्नात्वाभुंजीतमुक्तयोः। मोक्षानंतरमावियत्स्नानंतस्यशुध्यर्थ
तयासचैलंविधेयं। तदाचवृद्धवशिष्ठः। सर्वेषामेववर्णानांसू
तकेराहुदर्शने। सचैलंतुवैनंस्नानंसूतकान्नंतुवर्जयेदिति।
ग्रहणकालेतत्तःपूर्वंयावत्पक्वंतत्सूतकान्नंतदुपस्पृश्यादपिन
भुंजीत॥आदिमध्यावसानेषुयदिहितंतत्स्यफलोतिश्रयउक्तो
ब्रह्मपुराणे। उपमर्दंलक्षगुणंग्रहणेसोमसूर्ययोःपुण्यंको

द्विगुणं मध्ये मुक्तिकाले नंतकमिति। अत्र ग्रहणे यद्दानं तत्सपात्रे कर्त्तव्यं। तदुक्तं महाभारते। अयने विषुवे चैव ग्रहणे सोमसूर्ययोः। पात्रभूताय विप्राय भूमिं दद्यात्सदक्षणामिति। पात्रलक्षणं महायाज्ञवल्क्येन। विद्यया केवलया तपसापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते। पात्रमुख्यानुकल्पावाह। बोधायनः। श्रोत्रियाय श्रोत्रियो वापि पात्रं वापात्रमेव वा। विप्रब्रुवोपि वा विप्रो ग्रहणे दानमर्हतीति। अत्र भूमिषड्वादीन्यपि देयानि। तदुक्तं महाभारते। भूमिर्गावः सुवर्णं वा धान्यं वा यद्यदिप्सितं। तत्सर्वं ग्रहणे देयं मात्मनः श्रेयमिच्छतेति। प्रतिग्रहीतृदानेन फलतारतम्यं दक्षणोक्तं। समस्मै ब्राह्मणे दानं द्विगुणं ब्राह्मणाय वै। श्रोत्रिये शतसहस्रं पात्रे

स्नानत्यमशक्तौ इति। अङ्गिरसः सूर्यग्रहणे रात्रौ चंद्रग्रहणे चैत्यवं प्रसिद्धिः सर्वजनीनात्। दृश्यग्रहणे यदुक्तं व्यंतदुक्तं। यत्तु कालविपर्ययेण प्राप्यमाणं ज्योतिःशास्त्रमात्रप्रसिद्धं ग्रहणं तत्र स्नानदानादिकं न कार्यं। तदुक्तं निगमे। सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तदा। तत्र स्नानं न कुर्वीत दद्यादानं न चैव हि। इति यस्तु मयोजाबालिराह। संक्रांतौ पुण्यकालस्तु षडशीतिमुखः कालः। चंद्रसूर्योपरागस्तु यावद्दृश्यो न गोचर इति। ग्रस्तास्तमयनपर्यंतं दृश्यो न गोचरत्वात्तावत्पुण्यकालोऽवधिः। ग्रहणे भोजनव्यवस्थामाह। मनुः। चंद्रसूर्यग्रहे स्नात्वा दद्यात्स्नात्वा विमुक्तयोः। अमुक्तयोस्तु कुर्वाणो याति दृष्टो न शुद्धतीति। ग्रहे ग्रहणकालस्य शीघ्रत्वमोक्षपर्यंतो ग्रहणकालः। तस्मिन्काले न भुंजीत किंतु राहु

पावंद्रसूर्ययोर्मुक्तयोःस्नातोःपश्चात्स्नात्वाभुंजीतायदातु
ग्रस्तास्तमयस्तदापरेद्युर्विमुक्तौतोदृष्ट्वाभुंजीतनकेवलं
ग्रहणकालेभोजनाद्यावः।किंतुग्रहणात्प्रागपिपीतदाहव्या
सःनाद्यात्सूर्यग्रहात्सर्वमहिसायंरात्रौग्रहात्।ग्रहणका
लेचनाश्नीयात्स्नात्वाश्नीयादिमुक्तयोःमुक्तेनिशिनभुंजी
तयदिनस्यान्महानिशाअमुक्तयोरस्तगयोर्दद्याद्द्वापरे
रुनीतिःपूर्वकालेभोजननिषेधविशेषमाहवृद्धवशिष्ठः॥२७॥
ग्रहणंतुरवेर्दिवाःप्रथमादर्धयामतःभुंजीतावर्तनात्सू
र्येपश्चिमप्रथमादर्धःरवेस्तावर्त्तनाद्ध्रुवमेवागेवनिशी
थतःचतुर्थेप्रहरेचेत्स्याच्चतुर्थप्रहरादर्धेतिप्रथमयामा
त्पूर्वंग्रहणंचेत्।आवर्तनात्मध्याह्नात्सर्वंभुंजीतरात्रिप

श्चिमयामेचेद्रात्रिप्रथमयामादर्वाग्भुंजीतअद्रसूतीय
प्रहरेचेद्विग्रहस्तदापूर्वदिनस्याद्रात्रौप्राग्भुंजीतअ
द्रचतुर्थप्रहरेरविग्रहणंचत्रात्रेश्चतुर्थप्रहरादर्धेभुं रा२
जीतेत्यर्थः।निशीथोमध्यमरात्रः।शशिग्रहणेयामत्रयेण
व्यवधानमपेक्षितं।सूर्यग्रहणेतुयामचतुष्टयेनेतितात्प
र्यार्थः।तथाचवृद्धगौतमः।सूर्यग्रहेतुनाश्नीयात्पूर्वयामा
मावतुष्टयं।सोमग्रहेतुयामास्त्रीन्बालवृद्धातुरेविनेति।बा
लवृद्धातुरविषयेमत्स्यः।अपराह्णेनमध्याह्नेमध्याह्नेन
तुसंगवेःभुंजीतसंगवेचेत्स्यात्तूपूर्वंभुंजीमावेरितिः।
समर्थस्यभोजनप्रायश्चित्तमुक्तंकात्यायनेनाचंद्रसूर्य

ग्रहेनुक्ताप्राजापत्येनशुध्यति।तस्मिन्नेवदिनेनुक्ताचिरात्रे
णोवशुद्ध्यतीति।शशिग्रहणेयामत्रयस्याप्यपवादमाहवृद्ध
वशिष्ठः।ग्रस्तोदयेविधिःसूर्येनाहर्भोजनमाचरेत्।ग्रस्ता
स्तमयेविशेषमाहवृद्धगुरुः।ग्रस्तावेवास्तमानंतुरात्रौदृष्ट्वा
नुभोजयेत्।परेह्यरुदयेदृष्ट्वास्नात्वान्यंवहेन्नरइतिवृ
द्धगार्ग्येपिसंध्याकालेयदाराहुर्ग्रसतेनिशानाकरो।
तदहर्नैवभुंजीतरात्रावपिकदाचनेति।विशुद्धमाम्रतेपि।
अहोरात्रंनभोक्तव्यंचंद्रसूर्यग्रहेयदा।मुक्तिदृष्ट्वातुभो
क्तव्यंस्नानंकृत्वाततःपरमितिनतुमेद्यंतद्दानंवा २५०॥
क्षयदृश्यंनसंभवतीत्येवंनादर्शनंग्रहेनशास्त्रज्ञान
स्यविवक्षितत्वात्।तदाहवृद्धगौतमः।चंद्रसूर्यग्रह्य

लोकपालाश्चग्रहदेवाधिदेवताश्चतेसर्वेतस्मिन्यातुगोपुरद्वारकृत
र्णाताविघ्नदेवास्तथादित्याःसाध्याश्चैवमरुद्गणाःक्षेत्रपीठो
पपीठानिनद्यश्चसागराःपातालेनागपत्न्यश्चनागाश्चैवक्ष
सर्वताःपिशाचावाग्रुह्यकाःप्रेतागंधर्वागणराक्षसाःपृथिव्या
पश्चतेजश्चवायुराराकाशंमरुद्वादिविनुव्यंतक्षेत्रंयत्रपातालवा
सिनःशिवाशिवस्तथाविष्णुःसिद्धिर्लक्ष्मीःसरस्वतीतपोधनाश्च
भगवान्ब्रह्मकःपरमेश्वरःक्षेत्रौषधिलतावृक्षावनस्पत्यधिदे
वताःकपिलःशंखनागश्चतक्षकोनंतएवच।अन्येजलचराजी
वाअसंख्याताश्चनेकशः।चतुर्दशयमाश्चैवयवान्येयवान्ययमकि ॥२५५
कराःसर्वेपियक्षराजानःपक्षिणःपशवस्तथा।स्वेदजोद्भिज्ज
जीवाश्चांडजाश्चजरायुजाः।अन्येकेवनजीवायेदृश्यानिर्गवि
हारिणः।अजागावोमहिष्यश्चयवान्येपशवस्तथा।तेसर्वेपि

श्रीः। अथेत्यादिश्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामोगोदानम
हंकरिष्यतदर्थं ब्राह्मणपूजनंवरणंचकरिष्येपात्रं संपूज्यतु
म्यमग्नांददामिदक्षिणेदक्षइत्यनेनपात्रहस्तेजलंदद्यात्। ब्राह्मणै
र्वंदनादिभिरभ्यर्थ्यअमुकशर्माखाध्यायिनमसुकशर्माणं
संप्रदानत्वेनत्वामहंवृणेवृतोस्मिइतिप्रतिवचनं। देयंद्रव्यंप्रो
क्ष्यगांसवत्साप्रोक्ष्यसंजयेत्। गवांमंत्रेषु। आवाहनंमयादत्तं
सुरभ्यैवसुनिर्मलं। सरभिर्वस्त्रदानेनप्रीयतांपरमेश्वरी तिव
स्त्रं। गावोममपुरतःसंतुगावोमेसंतुपृष्ठतः। गावोहृगवांमध्ये
वसाम्यहं। प्रदक्षिणांकृत्वा। सुरभिस्त्वंजगन्मातर्देविविष्णुपदे
स्थिता। ग्रासंगृहाणमदत्तंगोमातस्त्रातुमर्हसि। ग्रासंदत्वागोप
दंतर्पयेत्। पित्रादितर्पणंविधायब्रह्माणंयादेवताःसर्वाःऋषय
मुनयस्तथा। असुरायातुधानाश्चयमातरश्चंडिकास्तथा। दिक्पाला

...स्मन्नहनिपूर्वतःरोहिर्मुक्तिंविज्ञायस्नात्वाकु
र्वीतभोजनंइतिएवंतर्हिपरश्वःदद्यात्प्रागपिशास्त्र
विज्ञानसंभवात्। तदेवभोजनेप्रसज्यतेतन्नापरेद्यु
रदपेभ्यवहरेत्। अतोरात्रंनभोक्तव्यमितिवचनद्वयेनन
सतेनेमनुस्कंदपुराणेयदाचंद्रग्रहस्तातनिशीथा
तीनवेत्। भोक्तव्यंतातपूर्वेह्युःपरेह्युर्नक्तं
वैनिशीथाद्ग्रहणंयदाचंद्रस्यवैभवेत्तातत
भोजनंशिवेवाह्नेतिनदिवायामत्र
तुयामास्त्रीतिविशेषस्यवक्ष्यमाणत्वे
कामोयहणदिनमुपवसेत्तदाह प

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017